प्राक्शास्त्री

द्वितीयवर्ष, चतुर्थसत्रार्द्ध

पाठ्यांश – ०१ शास्त्रपरिचयः – दर्शनम् अध्ययनांक - ४

(Course – 01

Total Credits–04)

## प्रथमःपाठः

| | | |
|---|---|---|
| | **१. न्याय-वैशेषिकदर्शनम्**<br>क्रेडिट – १ (16 घण्टाः) | |
| १ | **न्यायदर्शनस्यपरिचयः** | **१. भारतीयदर्शनम् – दर्शनशब्दस्यव्युत्पत्तिः, दर्शनशास्त्रस्योद्गमःविकासः, भारतीयदर्शनस्यप्रवृत्तयःप्रयोजनंच।** |
| | | **1. दर्शनशास्त्रस्यप्रस्थानानि, भारतीयदर्शनस्यविविधप्रस्थानानांपरिचयः, आस्तिकदर्शनानांवैशिष्ट्यम्** |
| | | **2. न्यायदर्शनस्यपरिचयः, न्यायदर्शनस्यआचार्यपरम्परा** |
| | | **3. न्यायदर्शनस्यप्रमाणमीमांसा** |
| | | **4. न्यायदर्शनस्यप्रमुखाःसिद्धान्ताः** |
| २ | **वैशेषिकदर्शनस्यपरिचयः** | **5. वैशेषिकदर्शनस्यपरिचयः** |
| | | **6. वैशेषिकदर्शनस्यआचार्यपरम्परा** |
| | | **7. पदार्थाः** |
| | | **8. वैशेषिकदर्शनस्यप्रमुखाःसिद्धान्ताः** |
| | | **9. न्यायवैशेषिकदर्शनयोःसमानतन्त्रता** |

# द्वितीयःपाठः

| २. साङ्ख्य-योगदर्शनम्<br>क्रेडिट – १ (16 घण्टाः) | | |
|---|---|---|
| १ | **साङ्ख्यदर्शनस्यपरिचयः** | **1. साङ्ख्यदर्शनम् – साङ्ख्यशब्दस्यव्युत्पत्तिः, साङ्ख्यशास्त्रस्योद्गमःविकासश्च।** |
| | | **2. साङ्ख्यशास्त्रस्यप्रयोजनम्** |
| | | **3. साङ्ख्यदर्शनस्यआचार्यपरम्पराग्रन्थपरम्पराच।** |
| | | **4. साङ्ख्यदर्शनस्यप्रमाणमीमांसा** |
| | | **5. साङ्ख्यदर्शनस्यप्रमुखाःसिद्धान्ताः** |
| २ | **योगदर्शनस्यपरिचयः** | **6. योगदर्शनस्यपरिचयः, योगदर्शनस्यआचार्यपरम्पराग्रन्थपरम्पराच।** |
| | | **7. समाधियोगः** |
| | | **8. साधनयोगः** |
| | | **9. योगदर्शनस्यप्रमुखाःसिद्धान्ताः** |
| | | **10. साङ्ख्ययोगदर्शनयोःसमानतन्त्रता** |

## तृतीयः पाठः

| ३. मीमांसा-वेदान्त-दर्शनम्<br>क्रेडिट – १ (16 घण्टाः) | | | |
|---|---|---|---|
| १ | **मीमांसादर्शनस्यपरिचयः** | **१.** | **मीमांसादर्शनम् – मीमांसाशब्दस्यव्युत्पत्तिः, मीमांसाशास्त्रस्योद्गमःविकासःप्रयोजनंच।** |
| | | **२.** | **मीमांसाशास्त्रस्यप्रस्थानानि।** |
| | | **३.** | **मीमांसादर्शनस्यआचार्यपरम्पराग्रन्थपरम्पराच।** |
| | | **४.** | **मीमांसादर्शनस्यप्रमाणमीमांसा** |
| | | **५.** | **मीमांसादर्शनस्यप्रमुखाःसिद्धान्ताः** |
| २ | **वेदान्तदर्शनस्यपरिचयः** | **६.** | **वेदान्तदर्शनम् - वेदान्तशास्त्रस्योद्गमःविकासःप्रयोजनंच।** |
| | | **७.** | **वेदान्तदर्शनस्यविविधप्रस्थानानि।** |
| | | **८.** | **वेदान्तदर्शनस्यआचार्यपरम्पराग्रन्थपरम्पराच।** |
| | | **९.** | **प्रस्थानत्रयी – ब्रह्मसूत्रम्, उपनिषदः, श्रीमद्भगवद्गीता।** |
| | | **१०.** | **मीमांसावेदान्तदर्शनयोःसमानतन्त्रता** |

## चतुर्थः पाठः

| ४. नास्तिकदर्शनानि<br>क्रेडिट – १ (16 घण्टाः) | | | |
|---|---|---|---|
| १ | **चार्वाकदर्शनस्यपरिचयः** | **१.** | **नास्तिकदर्शनानि – चार्वाकशब्दस्यव्युत्पत्तिः, चार्वाकदर्शनस्यइतिहासःप्रयोजनंच।** |
| | | **२.** | **चार्वाकदर्शनस्यप्रमुखाःसिद्धान्ताः।** |
| 2. | **जैनदर्शनस्यपरिचयः** | **३.** | **जैनदर्शनस्यपरिचयः।** |
| | | **४.** | **जैनदर्शनस्यआचार्यपरम्पराग्रन्थपरम्पराच।** |
| | | **५.** | **जैनदर्शनस्यज्ञानमीमांसा, तत्त्वमीमांसा, आचारमीमांसाच।** |
| | | **६.** | **जैनदर्शनस्यप्रमुखाःसिद्धान्ताः** |
| २ | **बौद्धदर्शनस्यपरिचयः** | **७.** | **बौद्धदर्शनम् -** |

| | | |
|---|---|---|
| | | **बौद्धदर्शनस्योद्गमःविकासःप्रयोजनंच।** |
| | | ८. **भगवतःबुद्धस्यपरिचयः, बौद्धदर्शनस्यविविधप्रस्थानानिच।** |
| | | ९. **बौद्धदर्शनस्यआचार्यपरम्पराग्रन्थपरम्पराच।** |
| | | १०. **बौद्धदर्शनस्यप्रमुखाःसिद्धान्ताः** |

**सन्दर्भग्रन्थाः** –


- भारतीयदर्शन, बलदेवउपाध्याय, शारदाप्रकाशनवाराणसी
- सर्वदर्शनसंग्रहः,माधवाचार्य
- तर्कभाषा, केशवमिश्र, चौखम्बाप्रकाशन, वाराणसी
- सांख्यदर्शनकाइतिहास,पं. उदयवीरशास्त्री
- सांख्यकारिका, ईश्वरकृष्ण
- वेदान्तसार, सदानन्दयति
- अर्थसंग्रह, लौगाक्षिभास्कर

# भारतीय संस्कृति

डॉ. वाई. एस. रमेश

# भारतीय दर्शनानि

संसारे सर्वा अपि मानवजीवनप्रक्रियाः, संस्थाः, सामाजिक-धार्मिकाचारविचारव्यवहारप्रवृत्तयः। कञ्चन दार्शनिकसिद्धान्तमाधृत्यैव प्रवर्तन्ते। दर्शनमेव सर्वस्यापि देशस्य संस्कृतेः प्रतीकभूतमास्ते। दर्शनं हि लोकव्यवहार-प्रवर्तकं, प्रवर्धकं, परिवर्तकं चेति कथने नास्त्यतिशयोक्तिः कापि। तादृशि संस्कृतेः प्रतीकभूतानि भारतीयदर्शनान्यस्माकं मान्यानि सन्ति।

दृश्यन्ते साक्षात्क्रियन्ते विचार्यन्ते वा आत्म-अनात्मपरमात्मसम्बन्धिन्यो विविधाः समस्याः यत्र येन वेति व्युत्पत्त्या सिद्धो 'दर्शनम्' इति शब्दो मूलतोऽध्यात्मविद्यां सूचयति। दर्शनं नाम तत्त्वविचारः। तत्त्वमित्येतत् 'तत्' 'त्वम्' इति द्वाभ्यां युक्तमस्ति। 'तत्' इत्यनेन विशालप्रकृतिः तन्मूलको सत्पदार्थः। बाह्यान्वेषणबलादसौ अवगम्यते। 'त्वम्' इति तु मनुष्यः। मनुष्ये-अन्तर्निहितः सत्पदार्थ एव त्वम्। तत्तु आत्मान्वेषणबलादवगम्यते। एवं मानव-प्रकृत्योः सत्पदार्थानां समैक्यमेव-'तत्त्वम्' प्रतिपादयति। प्रपञ्चे प्रत्यक्षाणि-परोक्षाणि च कानिचन वस्तूनि भवन्ति। 'भूमिः, जलम्, अग्निः'-इमानि प्रत्यक्षाणि वस्तूनि। 'जीवः, आत्मा, पुण्यम्, पापम्'-इति परोक्षाणि वस्तूनि। एकैकमपि वस्तु विचित्रं भवति। वस्तूनां स्वभावा अपि विचित्रा भवन्ति। वस्तूनां तत्स्वभावानां च विचारे दर्शनानुभवः प्रधानम्। दर्शनानुभवविभेदादेव भारतवर्षे बहूनि दर्शनान्यभिवृद्धिं गतानि।

सर्वमपि दर्शनं तत्त्वान्वेषणपरमास्ते। सर्वस्यापि चिन्तनमेवालम्बनमस्ति। चिन्तनं चानुभवसञ्चितविकारेभ्यः परं भवति चेदेव 'तत्त्वस्वभावो' द्रष्टुं शक्यते। किन्तु मानवानुभवः ज्ञानेन्द्रिय-कर्मेन्द्रियाणामधीनोऽस्ति। इमानि-इन्द्रियाणि 'मनः' बाह्यजगता सह समाकृष्यानेकान् मानसिक विकारान् उत्पादयन्ति। बाह्यप्रपञ्चेन सह सम्बन्धं विना जीवनं दुर्लभम्। अतएव

दार्शनिकाः संसारे जीवन्त एव प्रापञ्चिकबन्धनेषु अनासक्तिपरां मानसिकप्रवृत्तिमभिवृध्य निःसङ्गेन मनसा तत्त्वान्वेषणं विदधति। अतो भारतीय तत्वशास्त्रे तात्त्विकदृष्ट्या सह तदनुगुणं जीवनविधानमपि प्रस्फुटं भवति।

भारतीय तात्त्विकानामन्तर्दृष्टिभेदात् 'लौकिकवादः', 'पारलौकिकवादः', 'निसर्गवादः', 'परिणामवादः''यदृच्छावादः', 'भौतिकवादः', 'द्वैतवादः', 'अद्वैतवादः', 'विशिष्टाद्वैतवादः'—इति यद्यपि बहवो वादाः समजायन्त तथापि भारतीयदर्शनं तावत् प्रथमतो द्विधा विभज्यते। वैदिकदर्शनम् अवैदिकदर्शनं चेति। तत्र वैदिकदर्शनं षोढा विभज्यते-सांख्यम्, योगः, वेदान्तः, मीमांसा, न्यायः, वैशेषिकं चेति। अवैदिकदर्शनं पुनः त्रिधा विभज्यते-चार्वाकदर्शनं, जैनदर्शनं-बौद्धदर्शनं चेति।

'नास्तिको वेदनिन्दकः' इति मनुवचनात् 'वेदाः प्रमाणम्' इति ये नाङ्गीकुर्वन्ति ते 'नास्तिकाः', वेदोऽपौरुषेयः सः स्वतः प्रमाणम् इति, वेदप्रतिपादित विषय एव सार्वकालिकं सत्यमिति ये पुनः अङ्गीकुर्वन्ति ते सर्वे 'आस्तिका' इति ज्ञायते।

ततो गच्छता कालेन चार्वाक-बौद्ध-जैन दर्शनानि नास्तिकदर्शनानीति, न्यायवैशेषिक सांख्ययोगमीमांसा वेदान्तेति षड्दर्शनानि आस्तिकदर्शनानीति परिगणितानि इति 'वेदाः प्रमाणम्' इति अङ्गीकरणमनङ्गीकरणमेव विभागप्रकल्पनाया आधारोऽस्ति।

भारतीयदर्शनानामाधारः 'वेदाः' एव। आस्तिक-नास्तिक दृष्ट्यापि वेदस्यैव महत्त्वं प्रतिपाद्यते। यतो हि वेदानां समर्थने खण्डने वा चिन्तनं प्रवृत्तम्।

'ईश्वरः-आत्मा-सत्यम्-कर्म-पुनर्जन्म-मुक्तिः' इत्येते विषया एव समेषां दर्शनानां विचारपरा आसन्। यैः यथा 'यथार्थतत्त्वं दृष्टं तथा तस्य दर्शनस्य सिद्धान्ताः रूपमाकलिताः। दृष्टि भेदेनापि 'दर्शनं' भिन्नमिति ज्ञायते। तत्त्वस्य साक्षात्कारो हि दर्शनमिति सर्वविदितम्। उक्तं च मनुना—

**सम्यक् दर्शनसम्पन्नां कर्मभिर्न निबध्यते।**
**दर्शनेन विहीनस्तु संसारं प्रतिपद्यते॥** [मनु. ६/७४]

इति। 'दर्शनमेव' पुरा आन्वीक्षिकी विद्येति प्रकीर्तितमासीत्। अनयैव सर्वा विद्याः प्रकाशन्ते, सर्वे धर्माश्च समाश्रिता भवन्तीति चाणक्यो ब्रवीति—

**प्रदीपः सर्वविद्यानामुपायः सर्व कर्मणाम्।**
**आश्रयः सर्वधर्माणां शाश्वदान्वीक्षिकी मता॥**

[कौटिल्यः अर्थशास्त्रं १/२]

इति।

किं च सर्वाण्यपि भारतीयदर्शनानि सामान्यनैतिकनियमेषु एकीभावमभिव्यञ्जन्ति। 'मोहः संयमने स्थापनीय इति, जीवहिंसा न करणीयेति, सुखस्य दुःखस्य वा समावस्थया समवस्थानमिति च सर्वेष्वपि दर्शनेषु सिद्धान्त गोचरा भवन्ति।

## चार्वाकदर्शनम्

दर्शनं कमपि विषयं स्वदृष्ट्या परीक्ष्य प्रस्फुटयति। तद्द्वारा तद्दर्शनस्य वैशिष्ट्यम् इतरदर्शनैः सह तस्य विभेदश्च गोचरौ भवतः। कानि दर्शनानि, कानि च न दर्शनानि इति ज्ञानमावश्यकम्। तद्गुणमेव दार्शनिकाः परस्परं विभक्ताः। प्रसिद्धं च 'आस्तिक-नास्तिक' दर्शनविभजनम्। विभजनस्यास्य 'आस्तिक' इति पदम् अनेकधाऽवगन्तुमस्माभिः शक्यते। 'अस्ति' इत्यस्मात् 'आस्तिक' पदमुत्पन्नम्। कमपि पदार्थं यथार्थत्वेन 'अस्ति' इति ये अङ्गीकुर्वन्ति ते सर्वेऽपि सामानार्थे आस्तिका एव। एतद्भिन्ना नास्तिकाः। कस्यापि पदार्थस्य यथार्थास्तित्वं नास्तीति ये ब्रुवन्ति ते सर्वे नास्तिका इति यावत्।

**"परलोको नास्तीति ये वदन्ति"** ते नास्तिका इति पाणिनिः। **'नास्तिको वेद निंदकः'** इति मनुः।

एवं दर्शनानि-द्विधा विभक्तानि। तत्र नास्तिकदर्शनेषु आद्यं 'चार्वाकदर्शनम्'। 'लोकायतम्' इति अस्यैव दर्शनस्य अन्वर्थं नामधेयमप्यस्ति। 'लोके सर्वत्र इदं मतं आयतं व्याप्तम्'—इति लोकायतम्। चार्वाकस्येदं दर्शनमितिहेतोः 'चार्वाक' इति नाम ख्यातमिति केचित्। 'चार्वाकः' राक्षस इति लोकायतं दैत्यानां दर्शनमिति अपरे। चार्वाकः बृहस्पति शिष्य इति

इतरे। 'चर्व' धातोः चार्वाक पदं निष्पन्नमिति, शरीरपोषणं प्रधानमिति विभाव्य भोजनादिषु प्रामुख्यं चार्वाकोऽङ्गीकरोतीति च अन्ये प्रवदन्ति।

चार्वाको वैतण्डिक इति प्रसिद्धिरस्ति। 'स्व वादः क इति न प्रतिपाद्य परेषां वादतिरस्करणमेव वितण्डवाद इति, उच्यते। चार्वाकः परलोकं तिरस्कृत्य तत्स्थाने नान्यत्किमपि प्रतिपादयदित्यतो वैतण्डिकेति गण्यते।

'लोकयात्रा' एव अस्य दर्शनस्य लक्ष्यम्। इहलोके परिश्रम्य यद्यदनुभोक्तव्यं तत्सर्वमनुभवेज्जनः तदतिरिक्तं किमपि नास्तीति दर्शनमिदं भावयति।

निखिलस्यापि प्रपञ्चस्य कर्ता, सृष्टिस्थितिलयकारको भगवान्, इति, सर्वज्ञः सर्वशक्तिसम्पन्नः, सर्वव्यापक इति तं देवं वैदिकाः विश्वसन्ति। तादृशमतिभौतिक सत्पदार्थं कमपि लोकायतिकाः नाङ्गीकुर्वन्ति। तत्पदार्थस्य यथार्थतानिर्णये वेदान् शब्दप्रमाणत्वेन वैदिकाः स्वीकुर्वन्ति। चार्वाकस्तु वेदान्-तदनुगुणं ज्ञानं च निरसति। पृथिवी-जलम् अग्निः, वायुः इति चतुरः मूलाभौतिकपदार्थान् कोऽपि न सृष्टवान्। ते स्वाभाविकरूपेणोत्पन्ना। क्रमशः जगदिदं तेभ्यः पदार्थेभ्यः परिणमितमिति भावयति तथाहि—

**अग्निरुष्णो जलं शीतं समस्पर्शस्तथानिलः।**
**तेनेदं चित्रितं तस्मात् स्वभावात् तद्व्यवस्थितिः॥**

पदार्थानां स्वभावोस्ति जननं-वर्धनं-प्रणशनं चेति। अतः जगति एकैकोऽपि पदार्थः प्रणश्यतीति तदतिरिक्तं किमपि नावशिष्यतेति च चार्वाकस्य वादः। अतएव चार्वाकाः भौतिकाः स्वाभाविकाश्चेति लोके कथ्यन्ते। मरणानन्तरं किमपि नावशिष्यते। पुनरागमनमेव न भवति तस्मात् सुखं जीवेत्। मरणानुपदमेव देहो नश्यति, देह संघटिताः भौतिकपदार्थाः तत्तन्मूलपदार्थेषु निलीना भवन्ति मानवास्यानुभवाः चिन्तनानि, स्मृतयश्च जीवनपर्यन्तमेव भवन्ति। मृत्युना सहैव प्रणश्यन्ति। जीवनकाले एतेषां अनुभवानाम् आधारोऽस्ति मनः। तच्च मनः भौतिकपदार्थेभ्योऽतीतं न विद्यते। तदपि भौतिकपदार्थजमेव । अतो भौतिक पदार्थैः सह तदपि नश्यति। तदतिरिक्तः शाश्वतः आत्मा नास्ति। मूलपदार्थानां सृष्टये, विभिन्नपदार्थानां विभिन्नेषु

रूपेषु संघटनाय च नान्या कापि शक्तिरपेक्षते पृथिवी, जलम् अग्निः, वायुरित्येतानि चत्वारि भूतानि अनेकेषां वस्तूनामुत्पत्तये मार्गमुपजनयन्ति। तत्तत्पदार्थानां लक्षणानि यथा स्वाभाविकानि तथैव तत्तत्परिणामोऽपि स्वाभाविको भवति।

नियतरूपेण परिणमनं-यथाविधिप्रवर्तनं च प्रकृतेः स्वभावोऽस्ति। मयूराः निसर्गत एव चित्रिताः, कोकिलाः निसर्गत एव मधुरं कूजन्ति। पुष्पाणि च विविधैर्वर्णैरलङ्कृतानि। ताम्बूल सेवनेन मुखं रक्तवर्णतामुपैति। ताम्बूले तु नागवल्लीदलानि सुधा-पूगीफल कादिरश्च भवन्ति। एतेषां संमिश्रणेन, पुनः पुनः चर्वणेन च मुखं रक्तवर्णतां याति। रक्तवर्णस्तावत् पृथक् पृथक् तेषु चतुर्षु पदार्थेषु [नागवल्लीदलानि + सुधा + पूगीफलं + कादिरः] यथा न भवति तथैव चतुर्भ्यो भौतिकपदार्थेभ्यो निखिलमपि जगत् परिणमति। यथा मद्यतः मदशक्तिर्जायते तथा चतुर्णां भूतानां सम्मिश्रणेन चैतन्यं जायते।

इन्द्रियगोचराभावादाकाशो नास्ति। तमेकं मूलभूतमिति चार्वाको नाङ्गीकरोति॥

एतेषां प्राकृतिकपदार्थानां स्वभावानां संघटनांच अवगमनमेव 'ज्ञानम्' इति चार्वाको वदति।

ज्ञानस्यास्य साधनरूपेण प्रत्यक्षमेकमेव प्रमाणमिति निर्दिशति। 'प्रमा' इत्युक्ते यथार्थज्ञानम्। तादृक् ज्ञानसाधनमेव प्रमाणम्। तच्च प्रत्यक्षमेकमिति लोकायतिका अभिप्रयन्ति। प्रत्यक्षमित्यनेन चक्षुरिन्द्रियजन्यं ज्ञानमित्येव न, अपि तु इन्द्रियैः लभ्यं सर्वमपि ज्ञानं प्रत्यक्षं ज्ञानम्। मानवः आत्मनः पञ्चेन्द्रियैर्ज्ञानमर्जयति। एवं ज्ञानोत्पादनमेव तेषामिन्द्रयाणां स्वभावः।

लोकायतिकाः निद्राणं समाजं प्रबोध्य, चैतन्यं चोत्पाद्य, स्वेच्छया चिन्तयितुं प्रेरितवन्तः। सदाचार नाम्ना प्रचलमानान् दुराचारान् निर्भयेन स्पष्टीकृत्य तत्स्वरूपं बहिः दर्शितवन्तः।

अग्निहोत्री, त्रिदण्डी, भस्मलेपनानि चेति बुद्धिहिनैः पौरुषहीनैः च स्वजीवनार्थं कल्पितानि।

**अग्निहोत्रं त्रयोवेदास्त्रिदण्डं भस्मगुण्ठनम्।**
**बुद्धि पौरुषहीनानां जीविकेति बृहस्पतिः॥**

भूमौ क्रियमाणेन श्राद्धतर्पणादिकर्मणा यदि पितरः तृप्तिं यान्ति तर्हि अट्टे स्थितस्य पुरुषस्यकृते अध एव भोजनं स्थापयतु—इति परिहसन्ति—

**स्वर्गस्थिता यदा तृप्तिं गच्छेयुस्तत्र दानतः।**
**प्रासादस्योपरिस्थानामत्र कस्मान्न दीयते॥**

यज्ञकर्मणि जन्तून् निहत्य तन्मांसं होमाग्नौ संभर्ज्य खादने तेषां जन्तूनां स्वर्गप्राप्तिर्भवतीति खलु बदन्ति। तादृशावसरः कस्मात् अस्मद् पितृभ्यः कल्पयितुं न शक्यते। यजमानस्य पितरं एव हत्वा साक्षात् स्वर्गं प्रेषयन्तु इति परिपृच्छन्ति—

**पशुश्चेन्निहत : ज्योतिष्ठोमे गमिष्यति।**
**स्व पिता यजमानेन तत्रकस्मान्न हिंस्यते॥** इति।

एवमीदृशैः प्रश्नैः वैदिक कर्मकाण्ड व्यवस्थां परिहसितवन्तः। इदं सर्वं कल्पितम् इति प्रचारयामासुः।

व्रतानाम् आचरणं वेदविहितकर्मणां नाम्ना यागादीनां करणं, यज्ञयागादि नाम्ना जीवहिंसनम्, परलोक सौख्यमभिवर्ण्य-इहलोक जीवनं दुर्भरं कृतवन्तः, स्वर्गः मोक्षः पिण्डप्रदानानि, श्राद्धतर्पणानि, भूरिदानानि चेति येषां जीवनार्थं बुद्धिर्नास्ति, पौरुषमपिनास्ति ते आत्मनः स्वार्थजीवनार्थम् इदं सर्वं कल्पितवन्त इमां दुरवस्थां निर्मूल्य संघं चैतन्यवत्कर्तुं लोकायतिकाः प्रायतन्त। अस्याः व्यवस्थायाः हेतुभूतान् वेदान्, वैदिक कर्मकाण्डं च ते सर्वात्मना निरसितवन्तः। वेदाः असत्याः परस्परविरुद्धाः, पुनरुक्तिदोषजुष्टाः सन्ति। अत एव केचित् कर्मकाण्डमवैदिकमिति वदन्ति चेत् अन्ये ज्ञानकाण्डमवैदिक मिति परस्परं विमृशन्तः स्वस्वभावानुगुणं वेदान् व्याख्यातुमुद्यताः। वेदोक्ताः वर्णाश्रमाः न फलदायका इति वर्णयन्त-स्वर्गो नास्ति नरको नास्ति परलोकोऽपि नास्ति। मरणानन्तरं परलोकं गच्छन्नात्माऽपि नास्ति। इति निर्दिशन्ति—

**न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः**
**नैव वर्णाश्रमादीनां क्रियाश्च फलदायकाः।**

इति।

पारलौकिकःआत्मा यद्यस्ति तर्हि कुतो कुटुम्बभरस्नेहेन पुनर्नायाति इति पृष्छन्ति। तथाहि—

**यदि गच्छेत्परं लोकं देहादेष विनिर्गतः।**
**कस्माद्भूयो न चायाति बन्धुस्नेह समाकुलः ॥**

जीवनमिदं दुःखभाजनं, एतस्मान्मुक्तिरेव जीवनलक्ष्यमिति, निरर्थकादेतस्माज्जीवनात् मरणमेवोत्तमम् इति निराशावादं लोकायतिकाः नाङ्गीकृतवन्तः।

जीवने कष्टसुखानि भवन्त्येव। क्वचित् कदाचिल्लभ्यतेति कथ्यमानाय सुखाय शरीरमिदं संकृष्य न नाशयेत्। याचकाः आगच्छेयुरिति पाचनं किमु न कुर्मः। क्षेत्रनाशकाः पशवः सन्तीति किं शस्यानि नोत्पादयामः? एवमेव दुःखभिया जीवनसुखानि न त्यक्तव्यानि। यो त्यजति सोऽस्ति मूढः। मरणानन्तरं शरीरं भस्मसाद् भवति। पुनरागमनं न भवति। तस्माद् यावज्जीवेम तावदृणं कृत्वा वा सुखेन जीवेम इति समाजं प्रबोधितवन्तः। तथाहि—

**यावज्जीवेत्सुखं जीवेदृणं कृत्वा घृतं पिबेत्।**
**भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥**

इत्थं साङ्घिकदुराचारान्, स्वार्थपराणां जीवन विधानानि, निराशानिस्पृहाभ्यां जीवतः, सौख्यविसर्जनमेव मोक्षसाधनत्वेन भावयतां मानसिक प्रवृत्तिं लोकायतिकाः व्यमृषन्त। अनेन विमर्षणेन केचिदेतान् भौतिकाः। पाखण्डा इति एतैरेव समाजस्य समूलनाशो भविष्यतीति प्रचारयन्तः लोकायतिकं ग्रन्थान् विध्वंस्य सनातनधर्मं परिरक्ष्य संतृप्तिं गताः।

वस्तुतस्तु लोकायतिकानां जीवनविधानं न तावत् जुगुप्साकरमास्ते। राजशासनमेव शिरोधार्यमिति ते मन्वते। यतो हि लोकप्रसिद्धो राजा एव परमेश्वरः इति तेषां दृढा मतिः आसीत्। साङ्घिकदुराचाराणाम् अनर्थानां च मूलभूतं कर्मकाण्डमेव निरसितवन्तः।

अपि च लोकायतिकाः पुरुषार्थानपि नाङ्गीकुर्वन्ति। इह लोके अनुभूयमानं सुखमेव पुरुषार्थः। धर्मबद्धौ अर्थकामौ मोक्षस्य सोपानौ इति, मोक्षसाधनमेव जीवनलक्ष्यमिति वैदिकाः वदन्ति मोक्षं भौतिक जीवनान्मुक्तिरिति यदि भाव्यते तर्हि लोकायतिका अपि मोक्षमङ्गीकुर्वन्ति।

'मरणमेव-अपवर्गः' इति बृहस्पति सूत्रमत्र अस्माभिः स्मर्तव्यम्। अतः मरणमेव मोक्षः। वर्णाश्रमधर्मानुगुणं स्वधर्ममपि लोकायतिकाः नाङ्गीकुर्वन्ति। यमनियमादीनङ्गीकृतवन्तः। यमाः सङ्घश्रेयोदायकाः, नियमाश्च मानवजीवनं नियतं कुर्वन्ति इति।

चार्वाकदर्शनम् अर्वाक्तनानां दर्शनानां प्रभावोत्पादकमभवत्। लोकायतिकानां प्रश्नानेव आधृत्य सर्वाण्यपि अर्वाक्तनानि दर्शनानि स्वसिद्धान्तान् समीक्ष्य समाधानरूपेण अभिवृद्धिं गतानि।

यद्यपि केवलं लौकिकजीवनाय प्रामुख्यदानं लोकायतस्य लोपत्वेन परिगण्यते तथापि भारतीय तात्त्विक वैविध्योत्पादने तद्वारा भारतीय संस्कृति परिणमने चार्वाकदर्शनस्य अस्तित्वमस्माभिः न जातु विस्मरणीयम्।

## जैनदर्शनम्

विश्वसाहित्ये जैनदर्शनमतिप्राचीनमास्ते। जिनेन प्रवर्तितं दर्शनं जैनदर्शनम्। 'षट्खण्डागमः' इति जैनानां परमप्राचीनो ग्रन्थः- चतुर्विंशतिस्तीर्थङ्कराः सन्तीति निर्दिशति। तेषु प्रथमः ऋषभदेवाख्यः अन्तिमश्च महावीराख्यः। सर्वेप्येते यद्यपि चारित्रकपुरुषाः न सन्ति तथापि जैनाः त्रयोविंशतितमं तीर्थङ्करं पार्श्र्वनाथाख्यं, चतुर्विंशतितमं महावीराख्यं तीर्थङ्करं च चारित्रकपुरुषाविति पूजयन्ति।

महावीरेण नितरां प्रभावितमिदं दर्शनं सृष्टि-स्थति-लयकारकं कञ्चनालौकिकं देवं नाङ्गीकरोति। जगदिदं भौतिकपदार्थानां परस्परसम्बन्धादेव वृद्धिं गच्छति, वैविध्यकारकं भवतीति, कालः-स्वभावः-नियतिः-कर्म-उद्यमश्चेत्यादीनां सहयोगेन वैविध्यमुपजायते। अतो एतदतिरिक्तः कश्चिद्देवो नास्तीति जैना वदन्ति। परं ते जैनतीर्थङ्करान् श्रद्धया पूजयन्ति। सम्यग् ज्ञानं, सम्यग् दर्शनं च लब्ध्वा कैवल्यपदमुपगताः जैनतीर्थङ्करा एव तेषां दृष्टौ देवाः। परिपूर्णमानवातिरिक्तः कश्चिद्देवो नास्तीति तेषां भावना।

तीर्थङ्कराणां प्रवचनानां मननं कुर्वन्तः, तेषां जीवनसरणिमनुसरन्तः संसारसागरमतीत्य 'केवला' भवितुं जैनाः प्रयतन्ते। एतदतिरिक्तः

परलोकोऽस्तीति विश्वसनम् परलोकसौख्यानि आशास्य इहलोके कर्माचरणं वा ते उररीकुर्वन्ति।

सम्यग् दर्शनम्, सम्यग् ज्ञानम्, सम्यक् चरित्रम् इति रत्नत्रयं जैनदर्शने सर्वैरपि जिनैरनुसरणीयं भवति।

जीवः दर्शनमोहाख्य कर्मणा मिथ्यादर्शको भवति। मिथ्यादर्शनमिदं जीवे बहुविधाः भ्रान्तीरुपकल्पयति। तद्वारा जीवो अधर्मं धर्म इति, कुमार्गं सन्मार्ग इति, अजीवं जीव इति, अमुक्तं मुक्त इति अवगच्छति। मिथ्यादर्शनमेतन्नैसर्गिकं स्यात्, परोपदेशोद्भवं वा स्यात् अनेन मिथ्यादर्शनेन एकान्तः-विपरीतं, संशयः, वैनयिकं, अज्ञानं चेति दोषाः सम्भवन्ति। एवम् सर्वस्यापि अनर्थस्य मिथ्यादर्शनमेव हेतुः। एतस्य निवारणादेव 'सम्यग् दर्शनं' भवति। सम्यग् दर्शनेन जीवः पदार्थस्य यथार्थतामुपगम्य सम्यक् ज्ञानमधिगच्छति। सम्यग् ज्ञानस्यास्ति सोपानं सम्यग् दर्शनम्, इमे दर्शने मिथ्या दर्शन, मिथ्याज्ञानस्य चावरणात् जीवं प्रमुच्य सम्यक् चारित्र्यं प्रति यतः। इत्थं-सम्यग् दर्शनात् सक्रमदृष्टिं, सम्यक्ज्ञानात् प्रकाशं, सम्यक्चारित्र्याच्च सन्मार्गानुसरणं जीवोऽधिगच्छति।

सिद्धान्तज्ञानाय आचरणेसम्पूर्णता प्रदानमेव सम्यक् चारित्रम्। इदं च मोक्षोपायोऽस्ति मुक्तिमिच्छन् जीवः इमं मोक्षोपायं लब्ध्वा तत्त्वस्वरूपं जानाति।

जैनाः पञ्चविधं ज्ञानमङ्गीकुर्वन्ति। तथाहि—

**मतिज्ञानम्** —ज्ञानोन्द्रियैर्लभ्यमेतत्। स्मृतिः + प्रत्यभिज्ञाता च
**श्रुतिज्ञानम्** —संज्ञाः, सेङ्कताः, शब्दाः,—एतै लभ्यं ज्ञानमिदम्
**अवधिज्ञानम्** —प्रत्यक्षमुपलभ्यमानम्।
**मनःपर्यायज्ञानम्** —परेषां मनस्सु किमस्तीति अवगमनम्।
**केवलज्ञानम्** —पदार्थान्, तद्विपर्ययाश्चावगमनम्।

केवलज्ञानसम्पन्नान् जीवनपर्यन्तम् 'अर्हन्त' इति। मरणानन्तरं 'सिद्धा' इति च सम्बोधयन्ति॥

सामान्य जना अपि संसारसागर समुद्धरणाय निर्मलबुद्ध्या नियतजीवनं यापयन्ति। सामान्येभ्यो दोषेभ्यः मनसः प्रक्षालनमेव नियतजीवनस्याद्यं

सोपानम्। रागद्वेषाभ्यां मनोनिवर्तनं यदि नास्ति तर्हि यतिजीवनेनापि मोक्षो न भवति।

महाव्रतानुसरणम् एकैकस्य जैनस्य धर्मः। अहिंसा-सत्यम्-अस्तेयः-ब्रह्मचर्यम्-अपरिग्रहा इत्येतेषाम् अनुसरणं हि महाव्रतानुसरणमास्ते।

जैना अहिंसावादिनः। जगति जीवयुक्ताः सर्वेऽपि पदार्थाः समा एव। जीवेषु श्रेष्ठः क्षुद्र इति भेदमेते नाङ्गीकुर्वन्ति। अतः कस्यापि जीवयुक्तस्य पदार्थस्य हानिर्नोपकल्पनीयेति तेषां व्यवहारः। अहिंसाव्रतस्य इयत् कठिनम् आचरणं जैनमतस्यैवेति कथने नास्त्यतिशयोक्तिः।

सामान्यं साङ्घिकं जीवनं परित्यज्य जैनसङ्घजीवनमुररीकृत्य केवलज्ञानाय यतमानाः प्रव्रज्यांस्वीकृत्य पञ्चमहाव्रतैः सह प्रभाते उत्थाय दैनन्दिनं प्रतिक्रमणं, दैनन्दिन प्रतिलेखनानि समाचर्य प्रातः र्विधीन् निर्वर्तयेयुः। विधिष्वैतेषु बोधन-भिक्षाटन स्वाध्याय-ध्यानादयो मुख्याः। सायं पुनः प्रतिलेखनं सम्पाद्य सायं प्रतिक्रमण सम्पादनेन तद्दिनं समाप्तमापद्यते।

संघं प्रविशता सामान्येन पञ्च-अतिचाराः त्यक्तव्याः। तथाहि—शङ्का-काङ्क्षा-विचिकित्सा-परप्रशंसा संस्तवनं चेति। सहैव द्वादशव्रतान्यपि अनुसर्तव्यानि।

द्वादशव्रतानि

पंच अणुव्रतानि — त्रीणिगुणव्रतानि — चत्वारि शिक्षाव्रतानि

**अणुव्रतानि**

१. स्थूल प्राणातिपातविरमणम् २. स्थूलमृषावाद विरमणम्
३. स्थूलादत्तादान विरमणम् ४. स्वदारसन्तोषः
५. परिग्रह परिमाण

**गुणव्रतानि**

१. दिग्विरतिः २. भोगोपभोग परिमाणः ३. अनर्थदण्डविरतिः

**शिक्षाव्रतानि**

१. सामयिकम २. देशविरमणम् ३. पौषघोपवासः ४. अतिथिसंविभागः

जीवस्य कर्मबन्धान्मुक्तिरेव नियनजीवनलक्ष्यम्। कर्मबुद्धो जीवः आत्मनिग्रहणद्वारा पूर्वसञ्चितं कर्म तत्फलितानि च नाशयन् नूतनानि कर्माणि न समाश्रयते। जैनमते तावत् कर्मापि किञ्चिन द्रव्यमास्ते तदपि सूक्ष्मरूपो भौतिकपदार्थ इति भावयन्ति। कर्म तावत् जीवमाश्रित्य, तदीय सहजलक्षणानि प्रमृष्य अजीवपदार्थैः सह जीवं सन्दधाति।

अयसा समैक्यमापन्नोऽग्निरिव कर्मजीवेन समैक्यमापद्य जीवं कर्मबद्धं करोति। सोऽयं कर्मपदार्थः सम्पूर्णमपि विश्वमावृत्य तिष्ठति। असौ पुण्यपापयो फलानि वर्धयति। एवं जीवाजीवयोः सम्बन्धः कर्मणा एव जायते। कर्मावरणान्मुक्तये नियतजीवनं विधीयते।

जैना अष्टौ कर्माणि प्रतिपादयन्ति।

१. **ज्ञानावरण कर्म**—साकारं ज्ञानं निरुध्य मिथ्याज्ञानं कल्पयति।

२. **दर्शनावरणकर्म**—निराकारं ज्ञानं निरुध्य ज्ञानशक्तिमवरुणद्धि।

३. **वेदनीयकर्म**—जीवस्यानन्दस्वभावं प्रमृष्य रागद्वैषौ जनयति।

४. **मोहनीयकर्म**—समुचितं दृक्पथं तिरोधाय जीवस्य चिन्तनं बाधां च दूषयति।

५. **आयुः कर्म**—कार्मणशरीरे जीवस्य कालं नियुङ्क्ते।

६. **नाम कर्म**—जीवेन लभ्यमानान् शरीर सामान्य विशेष धर्मान् निर्णयति।

७. **गोत्र कर्म**—जीवस्य जातिं कुलं, कुटुम्ब, साङ्घिकं स्थानं निर्दिशति

८. **अन्तराय कर्म**—सत्प्रवर्तनेच्छाया आघातमुपस्थापयति।

एतेभ्यः कर्मभ्यो मुक्तो जीव एव 'अर्हन्' शरीरत्यागानुपदमसौ सिद्धो भविष्यति।

जैनदर्शने तत्त्वं सप्तधा इत्यपि निरुपयन्ति। जीवः, अजीवः, आस्रवः, संवरः, निर्जराः, बन्धः मोक्षः इति, तत्त्वानि।

जीवः नित्यः नाना च। चैतन्यं जीवलक्षणम्। 'अनन्तज्ञानम्' अनन्तदर्शनम् अनन्तवीर्यम्, अनन्तसुखम् इति जीवस्य स्वभावाः। जीवः परिपूर्णः। कर्मणा पुण्यपापे प्राप्नोति। सञ्चितकर्मावरणादेव जीवस्य वीर्यं, परिपूर्णत्वं च तिरोभवतः। जीवो भौतिकपदार्थो नास्ति। भौतिकपदार्थे चैतन्यं न भवति।

जैनानां 'जीव' इतरेषु दर्शनेषु वर्ण्यमानः 'आत्मा' 'पुरुषः' इव पदार्थोऽस्ति। जीवस्य आदिरपि नास्ति अन्तोऽपि नास्ति।

जगति यावन्तश्चैतन्ययुक्ताः पदार्थाः सन्ति तावन्तो जीवाः सन्ति। जीवपरिमाणः परिमितो न विद्यते। कार्मणःशरीरपरिमाणानुगुणं जीवपरिमाणः वर्धते क्षीयते च। पिपीलिकायामात्मा पिपीलिका परिमाणो भवति। गजस्यात्मा गजपरिमाणो भवति। अतो जीवः दीप इवास्ते। कक्षस्य परिमाणमालक्ष्य दीपस्य प्रकाशपरिमाणः परिवर्तते। यद्यस्ति बृहत्प्रकोष्ठस्तर्हि प्रकाशोऽपि तनुते। लघु प्रकोष्ठे प्रकाशोऽपि तनुर्भवति। तस्माज्जीवो नित्यः, निश्चितश्च।

**अजीवः**—चैतन्यरहितः . जीवरहितश्च पदार्थोऽस्ति अजीवः। एषः भौतिकः।

असौ पञ्चधा—पुद्गलः, धर्मः, अधर्मः, कालः आकाशः इति। तत्र पुद्गलस्य रूपरस गन्धादिगुणास्सर्वे भवन्ति। प्रकाशः, उष्णता, अन्धकार इव शब्दमपि पुद्गल परिणामत्वेन भावयन्ति। भौतिकद्रव्याणि पुद्गलादेव वृद्धिं यान्ति। विकासं प्राप्य नश्यमानानि सर्वाण्यपि मूर्तद्रव्याणि पुद्गलाएव। एतस्माद् पुद्गलात्किमपि रूपं परिणमते। प्रपञ्चस्य भौतिकाधारस्तावत्—पुद्गलः जीवः आकाशश्च। एतदतिरिक्ताः सर्वेऽपि पदार्थाः पुद्गलादेव प्रभवन्ति।

पुद्गलः स्कन्धाणुरिति द्वयोः रूपयोर्भवति। अस्माभिः दृश्यमानाः पदार्थाः सर्वे स्कन्धपुद्गलाः। इमे स्थूलाः मूर्ताश्च। अणुपुद्गलास्तु—अत्यन्तं सूक्ष्मा अवयवरहिताः, अविभाज्याश्च। कर्मापि तादृश पुद्गल एव। आदिमध्यान्त रहितोऽणुरेव मूर्तपदार्थानां समेषां मूलमास्ते। अणवः समाः। परं तु ते विविधपदार्थानां सृष्टेः मूलभूताः।

**धर्मः**—जीवस्य पुद्गलस्य च चलने धर्मः आवश्यकः। यतो हि चलन नियतं कुर्वन्नैव धर्मः। धर्मोऽयं गुणसम्बन्धरहितः। असौ आकाशेन सहव्याप्तं निखिलमपि आवृत्य तिष्ठति। मूर्तः असङ्घटितश्चायं चलनप्रभावमसंश्लेषणेनैव चलित पदार्थान् नियतान् करोति।

**अधर्म**—एषोऽपि अमूर्तोऽसङ्घटितश्च। आकाशेन सह व्याप्तः। जीवस्यपुद्गलस्य च आधारभूतः। धर्माधर्मावुभावपि भौतिकावेव। चलन निश्चलयोरुदासीन हेतू स्तः।

**आकाशः**—व्यापकस्वभावयुक्तस्य जीवस्य आकाशोऽयं अवकाशं कल्पयति। लोकाकाशः अलोकाकाशः, इति आकाशो द्वेधा लोकाकाशे अनेकपदार्थानां मूलद्रव्याणि भवन्ति। अलोकेतु केवलं आकाशः।

**कालः**—कालस्य 'अस्तित्वं' विद्यते न पुनः कायत्वम्। सर्वस्यापि वस्तुनः अवस्थाप्राप्तौ कालः कारणम्। कालोऽयं अपरिमितः। तस्मिन् भ्रमणानि सन्ति। प्रत्येकं भ्रमणे समानव्यवधिभूतं युगद्वयमास्ते अवसर्पिणि उत्सर्पिणिरिति।

**आस्रव**—जैनमते कर्मणः प्रामुख्यम्। जीवाजीवसंधानं कर्मणः एव भवति। जीवस्य कर्म प्राप्तिरेव आस्रवः। भावास्रव कर्मास्रवाभ्यां कर्म अष्टधा जीवं प्राप्नोति।

**संवरः**—आस्रवभिन्नः संवरः। संवरो नाम कर्मणां निरोधः। सुशिक्षितेन नियतजीवनेनैव इदं साध्यमस्ति। सर्वाण्यपि कर्माणि भावसंवर कर्मसंवराभ्यां विभक्तानि। एताभ्यां कर्मप्राप्तिर्निरुध्यते।

**बन्धः**—कर्मास्रवमनु बन्धः। जीवस्य कर्मणा बन्धनमेव बन्धः। अस्मादेव जीवः जननमरणाभ्यां रागद्वेषाभ्यां च युक्तो भवति।

—निर्जरा पूर्वार्जित कर्मणां तपसा निरोधः।

भावनिर्जरा, कर्म निर्जरा चेति द्विविधा। कर्म निर्जरा तावत् कर्मफलानुभवद्वारा अथवा प्रयत्नबलाद् वा सिध्यति।

—कर्मणः मुक्तो जीवः जननमरणजालबद्धो न भवति। तदा मोक्षः। मुक्तः जीवः अनन्त ज्ञानं, अनन्तदर्शन-अनन्तवीर्यं-अनन्तसुखादीनि प्राप्य लोकाग्रं गच्छति। तत्र सिद्धशिलायां शाश्वतः तिष्ठति इदमेव सर्वस्यापि जैनस्य लक्ष्यमास्ते।

**स्याद्वादः**—प्रायः सर्वोऽपि जनः स्वानुभवं, ज्ञानं, अवगमनं च 'यथार्थमिति विभाव्य परेषामनुभवान्, ग्राह्यान् च अयथार्थ इति तिरस्कुरुते। केचित् सामान्यानि सत्यमिति विभाव्य विशेषान् असत्यमिति तिरस्कुर्वन्ति। अपरे सामान्यंविशेषं च अयथार्थमिति तयोराधरभूतं द्रव्यमेव यथार्थत्वेन परिगणयन्ति। विना सामान्यविशेषगुणै द्रव्यं न लभ्यते। अतस्ताभ्यां सह द्रव्यमपि न यथार्थमिति अन्ये विभावयन्ति।

इमे वादाः सर्वे परस्पर विरुद्धगोचराः। जैनदर्शने एते पाक्षिकाः सन्ति। जीवाजीवाः सन्त्यनेके। तेषां निश्चिता गुणाः सन्ति। परिवर्तनयोग्याः पर्याया विद्यन्ते। गुणपर्याया अनेके। इमाननेकान्गुणपर्यायान् वयं अनुभवादेव गृह्णीमः। द्रव्याणामभावे गुणपर्यायाः न भवन्ति। गुणपर्यायैरेव द्रव्यं दृग् गोचरतां याति। अतो यथार्थायथार्थाविति प्रश्न एव न भवति। किं चास्मदनुभवे सामान्याः विशेषाश्च गोचराः भवन्ति। सामान्यविशेषयोरविनाभावः। द्रव्याणाम् अनेके गुणाः, पर्यायाश्च भवन्ति। द्रव्यैः सहजीवन परा गुणाः। कालानुगुणं परिवर्तन शीलाः पर्यायाः असंख्याकाः। ते भूतभविष्यद् वर्तमानेषु परिवर्तिता भवन्ति।

अनुभवलभ्यं किमपि ज्ञानं अयथार्थमिति वक्तुं न शक्यते। किं तु अनुभवेन प्राप्ते ज्ञाने भेदा भवन्त्येव। अनुभवजन्यं ज्ञानं द्विविधमिति जैनाः विश्वसन्ति। प्रमाणं नयः इति।

कस्यचिद्द्रव्यस्य विद्यमानान् गुणपर्यायान् अवगच्छद् ज्ञानं प्रमाणमिति।

कस्यचिद्द्रव्यस्य उत पदार्थस्य सम्बद्धं कञ्चन अंशं, गुणं, पर्यायं वा अवगच्छद् ज्ञानं नय इति।

प्रमाणज्ञानं सर्वधर्म प्रतिपत्तिकमास्ते। इदं च केवलज्ञानिमात्रलभ्यम्। नयज्ञानं तु एकधर्मप्रतिपत्तिकम्। सामान्यजनमात्रलभ्यम्। सामान्यानामनुभवाः क्षणिकाः, तात्कालिकाश्च भवन्ति। सामान्यजनस्य ज्ञानं तत्तस्थानकाल परिमितमास्ते। अतो तत्पाक्षिकमेव, न सम्पूर्णमस्ति।

कस्मिंश्चित् समये, स्थाने च किमपि वस्तु वीक्ष्य 'अस्तीति' केचित् वदेयुः। अपरे अन्यत्र अन्यस्मिन्काले अथवा तत्रैव तस्मिन्नेव काले दृष्ट्वा वदेयुः। अपरे अन्यत्र अन्यस्मिन्काले अथवा तत्रैव तस्मिन्नेव काले दृष्ट्वा नास्तीति वेदयुः। केचन तत् कस्मिंश्चिद्रूपे अस्तीति अङ्गीकुर्युः अपरे तदेव अन्यस्मिन् रूपे नास्तीति वदेयुः।

घटमेव स्वीकुर्वन्तु। घटः क्वचित् कस्मिंश्चित् समये भवति। तस्मिन्नेव समये अन्यत्र न भवति। एष इदानीं घट रूपे विद्यते। मृद्रूपे नास्ति तथैव मृदवस्थायां यदा विद्यते तदा घटरूपो न विद्यते।

एवमेव नयज्ञानमपि परिवर्तते। सर्वेषामपि ज्ञानं पाक्षिकमेव। तस्मात् सर्वमपि

वाक्यं 'स्यात्' इति पदेन प्रारभेत। एतमेव जैनाः 'स्याद्वादः' इति प्रतिपादयन्ति। अयमेव 'सप्तभङ्गीनयः'।

सर्वोऽपि पदार्थः द्रव्यरूपेण एकः। बहुधर्मरूपेण अनेकः। एकमनेकं वेति अभिव्यक्त्या तदीयं पूर्णं ज्ञानं न लभ्यतेति सप्तभङ्गीनयः विवृणोति।

१. **स्यादस्ति**—[घटः इदानीं अत्र स्यात् ]

२. **स्यान्नास्ति**—[एष घटः इदानीं अन्यत्र अथवा अन्यस्मिन् समये अत्र स्यात् ]

३. **स्यादस्ति च नास्ति च**—घटोऽत्र इदानीमस्ति अन्यत्र नास्ति।

४. **स्याद् वक्तव्यः**—'घटरूपे उत मृद्रूपे' इति अस्पष्टे सति किमपि वक्तुं न शक्यते।

५. **स्यादस्ति च अवक्तव्यः**—घटरूपे विद्यमानेऽपि तदीय द्रव्यगुणभेदानां अनवगमने किमपि वक्तुं न शक्यते

६. **स्यान्नास्ति च अवक्तव्यः**—घटरूपे अवद्यिमाने सति तदधिकृत्य किमपि वस्तुं न शक्यते।

७. **स्यादस्ति च नास्ति चावक्तव्यः**—घटरूपे विद्यमाने मृद्रूपे अविधमाने कया दृष्ट्या पश्याम इति ज्ञानाभावे किमपि वक्तुं न शक्यते।

'स्याद् वादोऽयं'—ज्ञानं तावत्सापेक्षमिति, सामान्यजनस्य ज्ञानं न कदापि निरपेक्षमास्तेति, निरपेक्षं ज्ञानं तु परिपूर्णमिति केवलज्ञानिमात्रलभ्यं चेति स्पष्टयति।

परिदृश्यमाने जगति अनुभूयमानं जीवनं सक्रममर्गे प्रवर्तयदिदं जैनदर्शनं मानवमूल्यनां प्रोत्साहकमास्ते। जैनानां सङ्घसमुद्दरणाभिलाषो अनन्योऽस्ति। यद्यपि तेषा कठोर नियमाः, सर्वजनानङ्गीकार्यास्तथापि सर्वेणापि अवश्यमनुसरणीया इति परिमिते समूहे अपरिमितानि मूल्यानि जैन दर्शनमिदम् साध्नोदिति इतिहासः प्रमाणम्।

इत्थं मानव जीवनमूल्यपरम्परया जैन दर्शनं भारतीयानां संस्कृतिं सभ्यतां च विकासयदिति निश्चप्रचम्।

## बौद्धदर्शनम्

इदमपि दर्शनं "वेदाः प्रमाणमिति नाङ्गीकरोति। अतः नास्तिकदर्शनेषु गण्यते। बुद्धस्य दर्शनं धर्मं चावगन्तुं पालिग्रन्था एव समाश्रयणीयाः। बुद्धस्योपदेशमवलम्ब्य प्रवर्तितमिदं दर्शनम्। बुद्ध प्रवचनानि त्रिपिटकेषु' संघटितानि। विनयपिटकः, सूत्रपिटकः, अभिधर्मपिटकश्चेति पिटकत्रयम् प्रसिद्धम्। तत्र क्रमशः -सङ्घजीवनस्यावश्यका नियमाः, विभिन्नविषयाणां चर्चाः, दार्शनिक विज्ञानादयो संगृहीताः। एतान् प्रमुखान् पालिगुन्थानतिरिच्य जातककथाः, नागार्जुनस्य माध्यमिककारिकाः, अश्वघोषस्य बुद्धचरितम् सौन्दरानन्दः, ललितविस्तरः, सद्धर्मपुण्डरीकः, अष्टसाहस्रिक प्रज्ञापारमिता, सुवर्णप्रभासादयो संस्कृतग्रन्थाः बौद्धधर्मस्य महायानमतं, दर्शनं चावबोधने उपकृता भवन्ति।

ललितविस्तरग्रन्थाधारेण बुद्धस्य इतिवृत्तोऽस्माभिरवगम्यते। कोसलजनपदस्य राजा शुद्धोदनः बभूव। गौतमवंशोद्भवस्य तस्य 'मायादेवी' भार्या। तयोः पुत्र एव बुद्धः। 'सिद्धार्थ' इति प्रथमं नाम। परमजिज्ञासुरसौ जरामरणादि विषादकरस्थितिभिर्दुःखमयं जगत् दृष्ट्वा विरक्तः अभवत्। प्रापञ्चिक सौख्यानि विसृज्य प्रव्रजनं गतवतां निर्विषाद जीवनेन नितरां समाकृष्टो बभूव। राज्यं परित्यज्य मिताहारी च तपः आचरितवान्। गौतमेन ज्ञातानि आर्यसत्यानि, ज्ञाताः प्रतीत्यसमुत्पादसिद्धान्ता एव तं 'बुद्ध' इति प्रसिद्धिं नीतवन्तः।

मानवजीवनं दुःखमयम् इति सर्वे अङ्गीकुर्वन्ति। अस्मात् दुःखमय जीवनान्मुक्तये अनेके श्रमणाः ब्राह्मणाश्च बहून् मार्गन् संसूचयामासुः। इह जन्मनि लब्धं दुःखं पूर्वजन्म फलमिति, तदतीतुम् आनन्दमयं पारलौकिकं च जीवनमधिगन्तुं वैदिक कर्मकाण्डान्येव साधनानीति जनान् प्रबोधयन्तो ब्राह्मणाः वैदिक कर्मकाण्डं हिंसाकाण्डं अकारयन्। एतन्निरोधाय लोकायतिकाः जैना इतरे च श्रमणाः प्रयत्य किञ्चित्साफल्यमधिगतवन्तः। तत्र चार्वाकजैनयोर्दर्शनं चर्चितमेव।

प्रवृत्ति मार्गानुयायिभिः सङ्घजीवनं संक्षुभिते सति, निवृत्ति मार्गानुयायिनः

वैयक्तिक मोक्षम् अपेक्ष्य सङ्घत्यागिनोऽभूवन्। द्वावप्येतौ मार्गौ साङ्घिकाभिवृद्ध्य कारकौ न स्यातामिति विभावितो गौतमः द्वावपि मार्गौ परिहार्य 'मध्येमार्गं' प्रतिपादितवान्। सोऽयं 'अष्टाङ्गमार्ग' इति कथ्यते। आर्यसत्येष्वयमन्तिमः।

**'दुःखम्'** आर्यसत्यमिति, तत् परिज्ञेयमिति परिज्ञातमिति च,

**'दुःखसमुदयः'** आर्यसत्यमिति तत् प्रहातव्यमिति, प्रहीणमिति च,

**'दुःखनिरोध'**- आर्यसत्यमिति तत् साक्षात्कारयोग्यमिति साक्षात्कृतमिति च

**दुःखनिरोधगामिनी** प्रतिपदमार्यसत्यमिति अश्रुतपूर्वोऽयं नूतन धर्म इति बुद्धो भावयति।

संसारे दुःखमस्तीति अवगमनमेवाद्यं 'आर्यसत्यम्' अस्ति। सर्वोऽपि आत्मनः दुःखान्मुक्तये परान् पीडयितुं, दुःखयितुं वा न तिरोभवति। दुःखनिवारणार्थक्रमे प्रवृत्तौ हिंसनं, निवृत्तौ च देहदण्डनसम्पादनं भवति। अतो दुःखकारणं किमिति सर्वे अवगच्छेयुः।

दुःखस्य कारणमस्तीति ज्ञानमेव **'द्वितीयम् आर्यसत्यम्'**। किं तत् कारणम्? इत्यत्र मतभेदाःसन्ति। दुःखं तावत् स्वयंकृतमिति केचित्, परकृतमिति अन्ये, यादृच्छिकमिति अपरे, पूर्वसञ्चितकर्मफलमिति चेतरे प्रबोध्य तन्निवारणार्थपरतया कठिनं तपश्चरणमिति प्रोत्साहयन्ति स्म् सर्वमेतन्निरस्य 'तृष्णैकैव दुःखकारणमिति बुद्धोऽबोधयत्। तृष्णेयं कामतृष्णा, भवतृष्णा विनाशतृष्णा वा भवितुमर्हति। एताभ्य एव जन्म-जरा-व्याधिमरणानि दुःखकारकानि भवन्ति।

तृष्णा नाशे दुःखनाश इति अवगमनमेव **तृतीयमार्यसत्यमास्ते।**

तृष्णायाः प्रणशनविधानमेव आष्टाङ्गमार्ग इति ज्ञानं **चतुर्थम् आर्यसत्यम्।**

## बौद्धदर्शने चतुर्थमार्यसत्यं-

'दुःखनिरोधगामिनी प्रतिपद्' अस्ति। अस्यैव अष्टाङ्गिक मार्ग **इत्यपि** प्रसिद्धिरस्तीति ज्ञातम्। योगदर्शनस्य 'अष्टाङ्गयोग' इत्यस्यस्थाने **'अष्टाङ्गिक-**

मार्ग' इति बौद्धदर्शनेन कथितमस्ति। 'प्रतिपद' नाम मार्गः। चतुर्थमिदमार्यसत्यं दुःखनिरोधं यावत् प्रापयन् मार्गो भवति। संसारे सर्वस्यापि प्राणिनः निर्वाण एव गन्तव्यं स्थानमास्ते। निर्वाणपर्यन्तं प्रापयतो मार्गस्यैव नाम-अष्टाङ्गिक" मार्गः'

## अष्टावङ्गानि तावत-

१ सम्यग् दृष्टिः, २ सम्यक् संकल्पः, ३ सम्यग् वचनम्, ४ सम्यक् कर्मान्तः, ५ सम्यग्-आजीवः, ६ सम्यक् व्यायामः, ७ सम्यक् स्मृतिः, ८ सम्यक् समाधिश्चेति।

सोऽयं मार्गः बौद्धधर्मस्य आचारमीमांसायाश्चरमं साधनं वर्तते। मार्गेणानेन चलता सर्वेणापि आत्यन्तिकदुःखनाशः निर्वाणप्राप्तिरधिगम्यते। उक्तं च धर्मपदे-

**मार्गाणामष्टाङ्गिकः श्रेष्ठः सत्यानां चत्वारि पदानि**
**विरागः श्रेष्ठो धर्माणां द्विपदानां च चक्षुष्मान्।**
**एष एव मार्गो नास्त्यन्यो दर्शनस्य विशुद्धये**
**एतं हि यूयं प्रतिपद्यध्वं मारस्यैष प्रमोहनः॥**

## प्रतीत्यसमुत्पाद सिद्धान्तः

सार्वत्रिकोऽयं सिद्धान्तः।सर्वोऽपि स्वानुभवाधारेण शास्त्रीयदृष्ट्या च -"सर्वेऽपि **प्रापाञ्चकपदार्थाः** परस्परमाधाराधेयभावसम्बद्धा" इति अवगच्छति। एवमवगतमर्थम् 'प्रतीत्यसमुत्पाद इति नाम्ना बुद्धः प्रतिपादयति। संसारे सर्वोऽपि पदार्थः सर्वमपि लक्षणं परिवर्तनशीलम्।

## सिद्धान्तेऽस्मिन् द्वादशाङ्गानि—

१. अविद्या।
२. अविद्याप्रत्ययसंस्कारः।
३. संस्कारप्रत्ययविज्ञानम्।
४. विज्ञानप्रत्ययनामरूपम्।
५. नामरूपप्रत्ययषडायतनम्।

६. षडायतनप्रत्ययस्पर्शः।

७. स्पर्शप्रत्ययवेदना।

८. वेदनाप्रत्ययतृष्णा

९. तृष्णाप्रत्ययउपादानम्

१०. उपादानप्रत्ययभवः

११. भवप्रत्ययजातिः

१२. जातिप्रत्ययमरणम्

एवं दुःखस्य कारणपरम्परा भवति। अनया सम्भाव्यमानानि जरामरण शोकपरिदेवनानि दुःखनिरोधेन निराकर्तुं शक्यन्ते। अमुमेव प्रतीत्य समुत्पादसिद्धान्तं बोधिवृक्षस्याधोपविश्य अनुलोम प्रतिलोम क्रमेण (अनुलोमक्रमस्तावत् आरम्भतोऽन्तं यावत् प्रतिलोमक्रमस्तु अन्तादारम्भं यावत्)

मननं विधाय अनुलोमक्रमेण प्रतीत्यसमुत्पादं, प्रतिलोमक्रमेण च दुःखनिरोधविधानमसूचयत्।

तत्र चतुर्णाम् आर्यसत्यानामनवगमनं हि अविद्या। सर्वस्यापि दुःखस्य मूलं कारणं 'अविद्या। अविद्याया एव संस्कारा उत्पद्यन्ते। संस्कारो द्विविधः पुण्याभिसंस्कारः, अपुण्याभिसंस्कारश्चेति। संस्कारेभ्यो विज्ञानसिद्धिः। विज्ञानं नाम परिपूर्णापरिपूर्णकर्मणोर्फलमस्ति। मनः तत्फलासंभवानि सन्तोष निर्लिप्तानि, अष्टाङ्गमार्ग सिद्धा अलोभादोषादयः, चेतनत्वं च विज्ञानमिति कथ्यन्ते।

'विज्ञानाधारिते नामरूपे भवतः। 'नाम' इत्युक्ते मानसिकता, रूपम् इत्युक्ते देहत्वम्। वेदनाय, प्रत्यक्षाय, मानसिकसंस्कारेभ्यः च नामान्वयनं भवति। भौतिकप्रपञ्चस्यापि चेतनत्वमूलमास्ते। घनपदार्थाः द्रवपदार्थाः, उष्णता, चलनमित्येतेषां समेषां 'रूपान्वयनं भवति।

नामरूपाभ्यां षडायतनानि सिद्ध्यन्ति। नेत्रं, कर्णः नासिका, जिह्वा, देहादिग्रहणेन्द्रियाणि मनायतनेन मिलित्वा षडायतनानि भवन्ति।

षडायतनैरेव स्पर्शो भवति।

ग्रहणेन्द्रियाणां बाह्यजगता सह सम्बन्ध एव स्पर्शः।

नेत्रस्पर्शः श्रोतृस्पर्शः घ्राणस्पर्शः रसस्पर्शः, देहस्पर्श मनःस्पर्श इति। एतेभ्यः स्पर्शेभ्यो वेदना जायते।

ज्ञानेन्द्रियैः मनसि जायमाना 'अनुभूतिरेव' 'वेदना'। सर्वा अपि वेदनाः कर्म संस्कारैः सिद्ध्यन्ति। कस्यापि विषयस्यधिकृता स्पृहैव तृष्णा। तृष्णेयं त्रिविधा। काम भव विभवश्चेति। तृष्णया-उपादानं भवति। उपादानं नाम विषयलोलुपता। उपादानं चतुर्विधम्। काम-दुष्ट शील-आत्मा इति। एतेभ्यो भवः। भवो नाम सापेक्ष विकासः। कर्मोत्पत्तिभ्यामयं द्विविधः। भवादेव जन्म सिद्ध्यति। जन्मना जरामरणे भवतः।

एवं प्रतीत्यसमुत्पादस्येमानि द्वादशाङ्गानि भूत भविष्यद्वर्तमान जन्मनामनुगुणान् आधारान् सूचयन्ति। तत्र- अविद्या-संस्कारौ पूर्वजन्मनः विज्ञानं-नामरूप-षडायतन-स्पर्श-वेदनां-तृष्णा-उपादान-भवाः **वर्तमानस्य,** जाति-जरामरणानि **भविष्यस्याधाराः।**

इत्थं गौतम आर्यसत्यानि, अष्टाङ्गमार्गं प्रतीत्यसमुत्पादंच समुद्बोध्य सङ्घे सरलं जीवनं, परस्परमैत्रीं च प्रतिष्ठापितवान्। विविधनियमानुपकल्प्य, सङ्घजीवनं नियमबद्धं विधाय, धर्मं च सङ्घबद्धं कृत्वा बुद्धः परिनिर्वाणमगात्। तदारभ्य बौद्धाः

'त्रिशरणान्याश्रित्य पवित्रबुद्ध्या तानि प्रवदन्ति

'बुद्धं शरणं गच्छामि।

'धर्मं शरणं गच्छामि।

'सङ्घं शरणं गच्छामि'

इति।

भगवतः बुद्धस्य निर्वाणानन्तरं बौद्धदर्शने बह्व्यः शाखा उत्पन्नाः। तत्र 'हीनयानम्' 'महायानम् इति मुख्यौ। 'वैभाषिकाः' सौत्रान्तिकाः' इति हीनयानस्य भेदद्वयम्। योगाचाराः माध्यमिकाः इति च महायानस्य भेदद्वयम्। एतासां चतसृणामपि दार्शनिक शाखानामुत्पत्तौ चिन्तनभेद एव कारणम्। तथाहि।

**वैभाषिकाः-**

अभिधर्मकोषस्य 'विभाषाख्यां व्याख्यानुयायिनो वैभाषिका भवन्ति।

भौतिकप्रपञ्चोऽयं यथार्थमिति, प्रत्यक्षप्रमाणेन तस्यग्रहणं साध्यमिति च वैभाषिका भावयन्ति।

प्रत्यक्षज्ञानमन्तरा व्याप्त्यनुमानयोरवसरो नास्तीत्यतः प्रत्यक्षज्ञानमङ्गीकरणीयमिति ते प्रवदन्ति।

## सौत्रान्तिकाः

'सूत्रपिटकं' सौत्रान्तिका अङ्गीकुर्वन्ति। एते बाह्यप्रपञ्चं यथार्थमिति उररीकुर्वन्ति। प्रत्यक्षं तस्य ग्रहणमसाध्यमिति एते विभाव्यन्ति सौत्रान्तिका भावाधारिताः बाह्यप्रकृतेर्यथार्थतां अनुमानेन साधयन्ति। अतो 'भावानुमेय वादः' इति एतेषां वादस्य नाम।

बाह्यजगतः ज्ञानं मनसि उत्पादयितुं चतुरः उपाधीनेते प्रतिपादयन्ति। यथा-आलम्बन, समानान्तराधिपति सहकारोपाधयः।

ज्ञानार्थम् आकृ[illegible]न् कश्चन बाह्यपदार्थो अनिवार्यः। अयमेव **'आलम्बनम्**। **तांस्ता**[illegible]बाह्यपदार्थसङ्केतान् ग्रहीतुं चैतन्यमतिरपेक्षते सैव **'समानान्तरम'** एतज्ज्ञानस्य तत्स्वभावस्य च निर्धारकं **किञ्चन** ज्ञानेन्द्रियमावश्यकम्; तदेव **अधिपतिः** ऐतेषु सर्वेषु सत्स्वपि प्रकाशाद्युपाध्यभावे ज्ञानं न संभवति। एते सहकारिप्रत्यया इत्युच्यन्ते।

## योगाचाराः

अस्या बौद्धशाखायाः संस्थापकोऽस्ति मैत्रेयः। असङ्ग, वसुबन्धु, दिङ्नागादयो अस्याः प्रमुखाः।

सर्वमिदं बाह्यजगत् काल्पनिकमास्ते। यद्यपि बाह्यजगदस्ति तथापि तद्वयं साक्षात्प्रत्यक्षेण गृहीतुं न शक्नुमः। अतो भावानां मूलं किमिति वयं न जानीमः। अस्मद्भावानां बाह्यपदार्था एव हेतव इति नास्ति निश्चयः। मनः स्वयमेव भावान् स्रष्टुं प्रभवति। यतः अस्मद्-मनसि जयमानानां भावानाम् अनुगुणं पदार्थानां बाह्यजगति अभाव एव निदर्शनमास्ते।

विविधभावसंघातं हि मनः। तदेव यथार्थम्। योगाचाराणामयं वादः आत्माश्रयभाववादः' इति प्रसिद्धः।

**माध्यमिकाः**

संसारे पदार्थाः शाश्वताः अशाश्वताः वा न सन्ति। सर्वोऽपि पदार्थः प्रतिक्षणं परिवर्तते। परिवर्तनमिदं केवलं 'भ्रमोऽपि नास्ति एवं प्रतीत्यसमुत्पादेन सहजपरिवर्तनस्वभावं व्यक्तीकृत्य विरोधभावांश्च समन्वयमानो 'मध्येमार्गं' गौतमोऽवलम्बितवान्। तमेव मार्गं माध्यमिकाः समालम्ब्य प्रापञ्चिकसमस्यासु अन्वयामासुः। प्रतीत्यसमुत्पादलभ्यं सत्यं 'शून्यमिति' नाम्ना कथयमाना माध्यमिकाः शून्यवादिन इति प्रसिद्धिं गताः।

भौतिकं जगत्-अनुभवाः इमे मायया समुत्पन्ना भ्रमजनका एव। एतेषु सत्पदार्थो नास्ति। जगदगताः पदार्थाः सततं परिवर्तन्ते। सहैव अनुभवा अपि परिवर्तन्ते। तत्तत्परिवर्तनानुगुणं, तत्तदुपाधिप्रभावेन तत्तत्पदार्थस्य स्वभावा अपि परिवर्तन्ते। प्रतीत्यसमुत्पादोऽपि इदमेव सत्यं व्यनक्ति 'नास्ति किमपि शाश्वतमिति' प्रतिपादयति। अन्योन्याश्रयः कथमिति ज्ञापयति। तस्माद् अपरिवर्तनशीलः पदार्थः नास्ति कश्चित्। पदार्थाः 'भ्रमकाः' लक्षणानि अस्मदनुभवाश्च भ्रमरूपा एव। निर्वाणोऽपि वर्णनातीत आस्ते। प्रापञ्चिकप्रवृत्ते निर्गमनमेव निर्वाणः। **निर्वाणं साधयेदिति** निर्वाणो साधनीय इति चिन्तनमपि अविद्यैव। इत्थम् अनुभवस्याधारभूतं सर्वमपि भ्रमाकलितमेवेति माध्यमिकाः भणन्ति। सर्वमिदं संवृतसत्यमस्ति। अस्यां दृष्टौ सर्वमिदं यद्यपि सत्यमिति प्रतीयते तथापि पारमार्थिक दृष्टौ असत्यत्वेनैव प्रतीयते।

निर्वाणोऽपि एका अवस्था। अवस्थेयं अनिर्वचनीया। अतः निर्वाणः निषेधात्मको न विद्यते। सम्यक् सम्बोधिनः प्रापञ्चिकमर्यादाधिगमनमेव निर्वाणः। तथैव 'शून्य' मितीदं पदमपि द्वन्द्वातीतं पारमार्थिकं सत्यमेव प्रतिपदयति न पुनः सर्वराहित्य सिद्दान्तं प्रतिपादयति। वस्तुतः 'शून्यं' तावत् दृग्विषयप्रपञ्चातीतं यथार्थं प्रतिपादयति।

इत्थमनेन बौद्धदर्शनेन भारतीया संस्कृतिः सम्पूर्णे विश्वे प्रतिष्ठिता। **बौद्धधर्म प्रभाविता अनेके द्वीपान्तरस्था मनीषिणः भारतमेकं पवित्रस्थानमिति भावयन्तः भारतवर्षमेत्य भारतीयसंस्कृतेस्तत्त्वानि परिशील्य सामोदमभिवर्णयामासुः।**

## न्यायदर्शनम्

बौद्धादि नास्तिकदर्शनानां तत्सिद्धान्तानां च प्राबल्यं ह्रासयितुं वैदिकपारम्परिकसिद्धान्तान् सहेतुकं निरूपयितुं च आस्तिकानां दर्शनानि अभिवृद्धिपथमारूढानि। आस्तिकदर्शनानि षट्। तेष्वन्यतममास्ते न्यायदर्शनम्।

न्यायशास्त्रस्य 'न्यायसूत्राणि' इति मूलग्रन्थोऽस्ति। तं ग्रन्थं गौतममुनिः व्यरचयत्। अक्षपादः इति नामान्तरमस्यास्ति।

न्यायदर्शनमिदं षड्दर्शनालङ्कारभूतमिति, सर्वविद्याप्रदीपकमिति सर्वकर्मोपाय इति, सर्वधर्माश्रय इति च विमर्शकाः स्तुवन्ति।

**'प्रमाणैः अर्थपरीक्षणं न्यायः'**-इति, **'नीयते प्राप्यते यथार्थज्ञानं येन स न्यायः समस्तप्रमाणव्यापारात् अर्थावगतिर्न्यायः** इति, (वार्तिककारवचनम्)

**'बुद्ध्या यदुत्पन्नं तत्सर्वं न्यायमतम्'** इति च न्याय पदस्योत्पत्तिर्दृष्यते। दर्शनेऽस्मिन् प्रमाणानां प्रामुख्यमित्यतो 'प्रमाणशास्त्रमिति' परिशीलनादृष्ट्या त्रिषयाणामत्र तर्कणात् आन्वीक्षिकी इति, तर्कशास्त्रमिति चेदं दर्शनं कीर्त्यते। वादविद्येति सार्थकं नाम।

## वैशेषिकदर्शनम्

वैशेषिकदर्शनं सर्वशास्त्रोपकारकमास्ते। शब्दवैखरीं निर्णेतुं यथा पाणिनीयं व्याकरणशास्त्रं तथैव पदार्थस्वरूपनिरूपणे वैशेषिकमिति प्रसिद्धिः। तथा हि-

'काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्।'

इति।

अन्येषु दर्शनेषु अकथितं 'विशेष' इति पदार्थं प्रतिपादयतीत्यतो 'वैशेषिकमिति कथयन्ति। कणादमुनिः अस्य ग्रन्थस्य लेखकः। मुनिरसौ उलूकमहर्षेः पुत्रः। तेनापि 'औलुक्यदर्शनमिति अस्य नामान्तरमस्ति। वैशेषिकसूत्राण्यतिप्राचीनानि। गौतमन्यायसूत्राणामपेक्षया कणादस्य वैशेषिकसूत्राण्यतिप्राचीनानीति इतिहासकाराः प्रवदन्ति। अस्य दर्शनस्य 'पदार्थधर्मसङ्ग्रहः' इति भाष्यं प्रशस्तपादः निर्मितवान्।

न्यायवैशेषिकसिद्धान्तानां मेलनं बहुप्राचीनकालादेवोपक्रम्य "उद्योतकारस्य' न्यायवार्तिकटीकासमये समाप्तम्।

न्यायवैशेषिकसिद्धान्ताः परस्परपूरकाः। न्यायदर्शनप्रमाणानि वैशेपिक-दर्शनमङ्गीकरोति।

वैशेषिकाणां सप्तपदार्थान् नैय्यायिकाः स्वीकुर्वन्ति। विविधान् आत्मनः, भगवतोऽस्तित्वं, अणुजगच्चाधिकृत्य द्वयोरपि सिद्धान्तयोः समानभावत्वात् समन्वयदृष्ट्या 'एकंदर्शनम्' इति परिगणनं भवति।

न्यायवैशेषिकदर्शनमिति समन्वयदृष्ट्या केचित् ग्रन्थानपि अलिखन्। तेषु शिवादित्यस्य 'सप्तपदार्थी', लौगाक्षिभास्करस्य 'तर्ककौमुदी' विश्वनाथस्य 'भाषापरिच्छेद' इत्यादयो ग्रन्थाश्च प्रमुखाः।

पदस्यार्थः पदार्थः। पदमित्युक्ते अर्थबोधकः शब्दः। अर्थमित्युक्ते ज्ञेयम्, प्रमेयम् अभिधेयमिति वा वदन्ति। ईश्वरेच्छया पदानां तं तमर्थं बोधयितुं सामर्थ्यं भवतीति नैय्यायिकाः अभिप्रयन्ति। तथाहि-

**अस्मात्पदादयमर्थो बोद्धव्यः** इति। पदं किमपि अर्थवत् करोति पदार्थः। न्यायवैशेषिकदर्शनं सप्तपदार्थान् प्रतिपादयति द्रव्यं, गुणः, कर्म, सामान्यम, विशेषः, समवायः, अभावः इति। एतेष्वेव सप्तपदार्थेषु प्रपञ्चोऽन्तर्भवति। एतेषां पदार्थानां परिशीलनमत्र कुर्मः।

**द्रव्यम्-** द्रव्यं तावत् स्वतन्त्रः पदार्थः।

चेतनाचेतनपदार्था अस्मिन् अन्तर्भवन्ति। द्रव्याभावे एतेषामस्तित्वं नास्ति। गुणक्रियाणां द्रव्यमेवाधारः। पृथिवी, आपः, तेजः, वायुः, आकाशः, कालः, दिक्, आत्मा, मनः,'-इति नवद्रव्याणि।

**गुणः-**

गुणो द्रव्यमाश्रित्य तिष्ठति। स्वीयस्वभावो वा प्रवर्तनं वास्य नास्ति। वस्तुस्वभावस्तावद् ज्ञापयति। परं वस्तुस्थितेः कारणं न भवति। उत्पत्त्यवसरे क्षणकालं द्रव्यं तु गुणरहितं भवति। किंतु गुणः न कदापि द्रव्यं विसृज्य तिष्ठति। द्रव्याश्रयमपि गुणं न्याय वैशेपिकाः स्वतन्त्रपदार्थत्वेन गणयन्ति।

नित्यद्रव्याश्रिताः गुणाः नित्याः । अनित्यद्रव्याश्रिता गुणा अनित्याः । दर्शनेऽस्मिन् चतुर्विंशतिगुणा निर्दिष्टाः ।

## कर्म

कर्मापि गुण इव द्रव्याश्रितं भवति । गुणद्रव्ययोरपेक्षया 'कर्म' भिन्नः पदार्थः । कर्म इत्युक्ते गमनम् अथवा गतिरिति न्यायवैशेषिकाः कर्मपदं व्याकुर्वन्ति । गमनं पञ्चविधम् । तथा हि "उत्क्षेपणापक्षेपणाकुञ्चनप्रसारण गमनानि पञ्चकर्माणि" ॥

**सामान्यम्**—बहुषु वस्तुषु समानाबुद्धिरेव सामान्यं इति कथ्यते । घटेषु घटत्वं सामान्यम् ।

**विशेष**—नित्यद्रव्येषु परस्परं भेदोत्पादकः पदार्थोऽस्ति 'विशेष'। द्रव्याणामन्ते विद्यमानः, नित्यद्रव्येषु च विद्यमानः पदार्थः 'विशेष' इति कथ्यते

## समवायः

वस्तूनां परस्परसम्बन्धाज्ञाने तदवगमनं दुष्करं भवति । सम्बन्धो द्विविधः । बाह्याभ्यन्तराविति द्वयोः वस्तुनोः बाह्यसम्बन्धं 'संयोग' इति वदामः ।

एवं द्वयोः पदार्थयोरविनाभावसम्बन्ध एव समवाय सम्बन्धः । एष नित्यः ।

## अभावः

गुणग्रहणे द्रव्यसाहाय्यं यथा अपेक्षते अभावग्रहणार्थमपि तथैव भावसाहाय्यमपेक्षते । प्रागभावः प्रध्वंसाभावः, अन्योन्याभावः, अत्यन्ताभाव श्चेति चतुर्विधोऽभावः ।

एतेष्वेव सप्तसु पदार्थेषु प्रपञ्चोन्तर्भवति । एतेषां पदार्थानां तत्वज्ञानार्थं प्रमाणानि आवश्यकानि । तानि चत्वारि भवन्ति—'प्रत्यक्षम् अनुमानम्-उपमानम् -शब्द इति ।

भौतिकपदार्थाः स्वतन्त्रसत्या इति वैशेषिकाः प्रवदन्ति । पदार्थस्य तल्लक्षणानां च यथार्थग्रहणमेव 'प्रमा' । पदार्थे विद्यमानस्य लक्षणस्य विद्यमानत्वेन, विद्यमानलक्षणस्य चानवलोकनं भ्रमः । प्रमासाधनं प्रमाणम् । **प्रमा = यथार्थ ज्ञानं जनयतीति प्रमाणम् ।**

यथार्थज्ञानस्य साधनं प्रमाणम्। ज्ञाता भवति प्रमाता। यस्य च वस्तुनः ज्ञानं तदस्ति प्रमेयम्। 'प्रत्यक्षानुमानोपमान शब्दाः' न्यायदर्शने चत्वारि प्रमाणानि।

**"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्ताऽवयव तर्कनिर्णयवाद-जल्पवितण्डाहेत्वाभासछच्चलजाति निग्रहस्थानानां तत्वज्ञानान्निः-श्रेयसाधिगमः"।**

-इति न्यायदर्शनस्य इमे षोडश पदार्थाः वैशेषिकदर्शनस्य नवद्रव्याणि इव सन्ति। एतेष्वपि षोडशपदार्थेषु द्वादश 'प्रमेयानि' एव। अन्ये तु प्रमाणेन प्रमेयज्ञानोत्पादने सहायकाः।

वैशेषिकदर्शने तु-

**"धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्य-विशेषसमवायानां पदार्थानां साधर्म्य वैधर्म्याभ्यां तत्वज्ञानान्निःश्रेयसम्"**-इति सूत्रेण

द्रव्यम् गुणः, कर्म, सामान्यम्, विशेषः, समवाय, इति षण्णां पदार्थानां सामान्यधर्म-विशेषधर्मयोः तत्वज्ञानेन मोक्ष इति कथितम्।

## परमाणु सिद्धान्तः

सर्वेषां स्थूलवस्तूनां मूलस्वरूपं परमाणुः। विभाजयितुमशक्यो-ऽत्यन्तसूक्ष्मपदार्थो न्यायवैशेषिकदर्शने परमाणुरिति कथ्यते। तथाहि

**जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः।**
**तस्य षष्ठतमो भागः परमाणुः स उच्यते॥इति॥**

कणादस्य परमाणुसिद्धान्ते तावत् भूमिः, जलं, तेजः, वायुः (पृथिव्यप्तेजोवायव) इति चत्वारि भूतानि प्रत्येकस्मात् परमाण्वोरुत्पद्यन्ते। चतुर्णामेतेषां भूतानां चतस्रः परमाणुजातयः सन्ति। भौतिकपदार्थलक्षणानि रूपरसगन्धस्पर्शानि वस्तुनाशेन अदृश्यतां गच्छन्ति तथापि तानि लक्षणानि परमाणुषु भवन्ति। परमाणूनां राशिः, भारः, वेगप्रभृतयो गुणाः सन्तीति भावयन्ति। एकैकस्यामपि जातौ परमाणूनां संख्या अनन्ता। परमाणवः निरवयवाः, नित्याः। प्रथमं समानजातिसम्बद्धौ द्वौ परमाणू मिलित्वा द्वयणुकं भवति। द्वयणुकमेतन्

दृग्गोचरं भवति। त्रीणि द्व्यणुकानि मिलित्वा त्र्यणुकं भवन्ति। एतच्च सूर्यकिरणरेणुतुल्यं भवति।

अणुसिद्धान्तकाराः सर्वे प्रपञ्चोत्पत्तौ परमाणुन् मूलकारणत्वेन परिगणयन्ति।

परमाणवः जडपदार्था इति न्यायवैशेषिकदर्शनें परिगण्यन्ते। जडेषु अणुषु सञ्चलन कारकोऽस्ति ईश्वरः। ईश्वरेच्छया परमाणूनां परस्पर संयोगो-भवतीति न्यायवैशेषिक सिद्धान्तः। तदैव प्रपञ्चस्य सृष्टिर्भवति। प्रलयमपि दर्शनमिदं विचारयति। जीवानां विश्रामार्थमेव ईश्वरः प्रलयं सङ्कल्पयतीति न्यायवैशेषिकाः भावयन्ति। संयोगवशादुत्पन्नानि स्थूलद्रव्याणि तत्तत्परमाणुरूपेण विच्छिन्नानि भवन्ति। परमाणूनां वियोगादेव प्रलयः संभवति।

न्यायदर्शनानुगुणं ज्ञानाधिकरणं हि आत्मा। सोऽयमात्मा सर्वद्रष्टा, सर्वभोक्ता, नित्यः, सर्वगतश्च बाह्येन्द्रियैरयमप्रत्यक्षः। आकाशवदयमात्मा नित्य इति वैशिषिकदर्शनं वदति। ज्ञानं शरीरधर्मो नास्ति। यतः—

शरीरस्य कारणं यत्पृथिव्यादिभूतानि सन्ति तेषु ज्ञानं नास्ति। इन्द्रियाणामपि गुणरूप ज्ञानं नास्ति। अतः परिशेषेण ज्ञानम् आत्मनः गुणोऽस्तीति सिद्ध्यति। आत्मनः अनेन अनुमानं भवति।

**"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग"** इति सूत्रेण,

**"स्वरूपैकप्रतिष्ठानः परित्यक्तोऽखिलैगुणैः,**
**ऊर्मिषट्कातिगं रूपं तदस्याहुर्मनीषिणः**
**संसारबन्धनाधीनं दुःखक्लेशाद्यदूषितम्**

इति न्यायमञ्जरीश्लोकेन च-अविद्यायाः नाशेन रागद्वेषमोहानां नाशेन, जन्मनाशेन, दुःखनाशेन च अपवर्गप्राप्तिरिति स्पष्टम्। मुक्त आत्मा

ऊर्मिषट्कमतीत्य दुःखक्लेशादि सांसारिक बन्धेभ्यो विमुक्तो भवति। एवं सुखदुःखाभ्यां विरहितस्य चित्तस्य साम्यावस्थाप्राप्तिरेव दर्शनस्यास्य लक्ष्यम्।

## सांख्यदर्शनम्

आस्तिकदर्शनेषु, इदं दर्शनमतिप्राचीनमिति विमर्शकानामभिप्रायः। साङ्ख्यदर्शनस्य प्रवर्तकः कपिलमुनिः। तस्य कथा महाभारते भागवते च प्रसिद्धा। भागवतानुसारम् मुनिरसौ विष्णोः पञ्चमावतार इति ज्ञायते। मुनिवर्यस्यास्य आसुरिः, पञ्चशिखः इत्यादयः शिष्याः साङ्ख्यदर्शनस्य प्रचारमकुर्वन्। साम्प्रतमस्माभिर्लभ्यमानेषु ग्रन्थेषु ईश्वरकृष्णस्य 'साङ्ख्यकारिकाख्यो ग्रन्थः प्रामाणिकोऽस्ति।

सम् पूर्वकात् 'ख्या' धातोः 'साङ्ख्य' शब्दउत्पन्नः। साङ्ख्यमित्युक्ते-निर्दुष्टं ज्ञानम्। प्रकृतिपुरुषयोर्विवेचनज्ञानमत्र प्रधानम्। अस्मिन् दर्शने तत्त्वानां गणनं सरलं भवति। तत्त्वानि पञ्चविंशतिः। तेषां ज्ञानेन प्रकृतिपुरुषविवेकस्योदयो भवति।

अनेनापि कारणेन 'साङ्ख्यम्' इति दर्शनस्यास्य नाम सार्थकम्। उक्तं च-

**साङ्ख्यं सङ्ख्यात्मकत्वाच्च कपिलादिभिरुच्यते** इति मत्स्यपुराणे,

**सङ्ख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते**

**तत्वानि च चतुर्विंशन्तेन साङ्ख्यं प्रकीर्तितम्।** इति महाभारते।अपि च

**दोषाणां च गुणानां च प्रमाणं प्रविभागतः।**

**कञ्चिदर्थमभिप्रेत्य सा संख्येत्युपधार्यताम्** इति।

**'शुद्धात्मतत्त्वविज्ञानं सांख्यमित्यभिधीयते'** इति शङ्कराचार्यकथनानुगुणं 'संख्या' इत्यस्य आत्मनः विशुद्धरूपस्य ज्ञानमिति ज्ञायते।

**प्रकृतिः**—दर्शनेऽस्मिन् प्रकृतिपुरुषौ मुख्यौ।

तत्र 'प्रकरोतीति प्रकृतिः। प्रापञ्चिकवस्तूनां समेषां प्रकृतिरेव मूलम्। अखिलोऽपि संसारः स्वत एव अविर्भूतोऽपि प्रकृतिरव्यक्ता सती सूक्ष्मरूपे तिष्ठतीति **'अव्यक्तमिति' सम्बोधयन्ति।**

कार्यरूपे परिदृश्यमानस्य पदार्थसमुदायस्य प्रकृतिरेव हेतुः। सृष्टिप्रलयौ प्रकृतेरेव दशे। उत्पन्नमेकैकमपि वस्तु नश्यति। किंतु कदाचिन्नेयं ज़ायते म्रियते वा।

१. संसारे किञ्चनापि वस्तु परिमितम् अस्वतन्त्रं चास्ते। अतस्तदाधारभूतोऽपरिमितः स्वतन्त्रश्च पदार्थः स्यात्। तादृशपदार्थ एव प्रकृतिः'।

२ .लोकगतेषु निखिलेष्वपि वस्तुषु केचन सर्वसामान्यगुणाः दृश्यन्ते। तेषां सर्वसामान्यगुणानां किमपि मूलं कारणं भवेत् तदेव "प्रकृतिः'

३. उत्पन्नेषु सर्वेष्वपि वस्तुषु वृद्धिक्षयपरिणामान् वयमवलोकयामः। अत्र काचित् क्रियाशक्तिरन्तर्भूततया विद्यते इति ज्ञायते। सैव क्रियाशक्तिः-प्रकृतिः' सर्वस्यापि वस्तुनः किमपि कारणं स्यात्।

एकैकमपि वस्तु तदुत्पत्तिकारणस्य कार्यं भवति कार्यापेक्षया कारणस्याधिक्यम् अथवा समानत्वं वा अङ्गीक्रियते। तस्मात् जगत्कारणभूता प्रकृतिः जगतः समाना अथवा अधिका स्यात्। जगतः प्रकृतिः सूक्ष्म कारणमित्यतो तदपेक्षया शक्तिमती भवति।

प्रकृतिरियं त्रिगुणात्मिका वर्तते। संख्यानां प्रकृतौ'-सर्वोऽपि गुणः द्रव्यांश एव। तस्मात् गुणा एव प्रकृतिः। गुणेभ्यो भिन्ना न। गुणेषु सूक्ष्मांशाः केचन भवन्ति। एते चानन्ताः। सत्त्वम् रजः तम इति त्रयोगुणाः। तत्र सत्त्वगुणः (बुद्धिद्रव्यम) रजोगुणः (शक्तिद्रव्यम्) तमोगुणश्च (द्रव्यराशिः) एतेषां साम्यावस्थारूपा एव प्रकृतिः। सत्त्वरजस्तमो गुणानां क्रमशः शान्त-चलन-मोहादयः स्वभावाः। प्रकृतिर्निरन्तरं परिणामशीला। परिणामश्च द्विप्रकारः। सरूपपरिणामो विरूपपरिणामश्चेति। तत्र सरूपपरिणामः प्रलयरूप इति, विरूपपरिणामो सृष्टिरिति च वर्ण्यते।

पुरुषोऽस्ति निष्क्रियः, अतो विश्वकर्ता न भवितुमर्हति। विरुद्धस्वभाववतोः प्रकृतिपुरुषयोः परस्परसहयोगादेव विश्वपरिणामो सम्भवति प्रकृतौ पुरुषस्यातीतप्रभावादेव सृष्टिप्रलयौ भवत इति सांख्यदर्शनमभिप्रैति। अतः पङ्वन्धसम्बन्ध इव प्रकृतिपुरुषयोस्सम्बन्ध इति सांख्यैः सादृश्यात्मकतया 'विवृतम्।

प्रकृतौ सत्त्वाधिक्यात् 'महद्' उत्पद्यते व्यष्टिरूपबुद्धयः स्व 'अविद्यया

सह 'महत्त' एव पुरुषमाव्रजन्ति। इदमेव सर्वस्यापि विश्वस्य बीजमित्यतो 'महत्' इति कथ्यते।

बुद्धिः पुरुषश्च भिन्नौ। शुद्धसात्विकदशायां बुद्धेः धर्मः ज्ञानं-वैराग्यं चेति लक्षणानि भवन्ति। सर्वासामपि बौद्धिकक्रियाणां बुद्धिरेव आधारः। शोधनं, निर्णयश्चास्याः वैशिष्ट्यम्। मन इन्द्रियाणि च बुद्ध्यधीनानि कर्म कुर्वन्ति।

प्रकृतेः द्वितीयः परिणामोऽस्ति 'अहंकार':। 'महत्तः' अयं जायते। 'अहं' 'मम' इति च अभिमानाः अहंकारादेव उत्पद्यन्ते। अस्मादेव जीवः कर्तृत्वं भोक्तृत्वं च विन्दति।अहङ्कारदृष्ट्या प्रापञ्चिक वस्तूनामवलोकने तानि पुरुषसम्बन्धीनीति परिगणितानि भवन्ति। सात्विकाहंकारः, राजसोऽहंकारः, भूताद्यहंकारश्चेति अहंकारस्त्रिविधः। तत्र सात्विकाहंकारादेकादश इन्द्रियाणि, भूताद्यहङ्काराच्च पञ्चतन्मात्राणि उद्भवन्ति।

रूपरसगन्धशब्दस्पर्शा एव तन्मात्राणीत्युच्यन्ते। इमानि अत्यन्तसूक्ष्माणि भवन्ति। अतो इन्द्रियगोचराणि न भवन्ति। अनुमानप्रमाणेनैव ज्ञातव्यानि। शब्दतन्मात्रादाकाशः; शब्देनभागवतादि मेलित्वा वायुम्, शब्दस्पर्शाभ्यां मेलित्वा रूपतन्मात्रं तेजः, शब्द स्पर्शरूपैर्मेलित्वा रसतन्मात्रं जलं, शब्द स्पर्शरूप रसैमेलित्वा गन्धतन्मात्रं पृथिवीमुत्पादयति। पाञ्चभौतिकानां पृथिव्यप्स्तेजोवाय्वाकाशानां गन्ध-रस-रूप-स्पर्श-शब्दाः प्रत्येकं लक्षणानि भवन्ति एवं चतुर्विंशतितत्त्वानां क्रीडयैव विश्वमुत्पद्यते। पुरुषः न प्रकृतिः न वा विकृतिः।

उक्तं च-सांख्यकारिकायाम्-

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः**

(सां का-३)

प्रकृतिः पुरुषश्च उभावपि अनादी स्तः। तत्र प्रकृतिः जडा पुरुषश्च चेतनः। प्रकृतिरेव पुरुषस्य महाशक्तिरास्ते।

यथा जले रसः, सूर्ये तेजः तथैव प्रकृतौ पुरुषो व्याप्तः। सत्त्वरजस्तम

इति त्रिगुणात्मिका प्रकृतिः। सम्पूर्णसृष्टिरपि प्रकृतेरेव विकारः। कार्यकारणपरम्परया सृष्टिरचना भवति। प्रकृतिः कारणं महत्तत्वं तत्कार्यम्।

महतत्वं कारणम् अहंकारस्तत्कार्यम्। अहंकारः कारणं तन्मात्राणि तत्कार्यम्। तन्मात्रं कारणं पञ्चमहाभूतानि तत्कार्यम्। पञ्चमहाभूतानि कारणं सृष्टि स्तत्कार्यम् एवं कार्यकारणपरम्परेयं प्रचलति। यदेकस्य कार्यं तदन्यस्य कारणमस्ति। अस्याः परम्परायाः हेतुः 'मूलप्रकृति' रेव।

द्वितीयोऽस्ति पुरुषः।अम्भसि रस इव प्रकृतौ पुरुषो भवति। प्रकृतिरपि पुरुषेण सह शक्तिरूपेण तिष्ठति। पुरुषोऽयं सुखदुःखानां भोक्ता विद्यते। सुखदुःखानुभूतिः पुरुषस्यैव भवति।

विश्वात्मनोंऽश एव देहात्मा। य एवं पुरुषं त्रिभिर्गुणैः सह प्रकृतिं च जानाति। सर्वथा वर्तमानोऽपि सः मोक्षमधिगच्छति। प्रकृतिपुरुषयोर्ज्ञानेन निष्कलङ्को भूत्वा मोक्षार्हो भविष्यति।

इत्थं सांख्यदर्शने पञ्चविशतितत्वानि वर्ण्यन्ते। एतेषां पञ्चविंशति तत्वानां ज्ञानेन पुरुषो, मोक्षमश्नुते तथा हि-

**पञ्चविशंतितत्वज्ञो यत्र तत्राश्रमे वसन्।**
**जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः॥**

इति।

सांख्यदर्शने सत्कार्यवादः प्रसिद्धः। लोके कारणं कार्यं च भिन्नमिति कारणेन कार्य नूतनतया उत्पद्यते इति च कल्पना अस्ति। परंतु कारणे अविद्यमानस्य कार्यस्य कथमुत्पत्तिः स्यात्? अतः कार्यस्योत्पत्तिर्न भवति प्रत्युत अभिव्यक्तिर्भवति। यतो हि-

मृदा घटो भवति। अत्र मृदस्ति कारणं घटोऽस्ति कार्यम्। कारणवस्तु सदस्ति परं कार्यवस्तु असदस्ति। सदसतोः (कारणकार्ययोः) सम्बन्धोऽसम्भवः। यदि कारणात्कार्योत्पत्तिरिति मन्यते तर्हि मृदो वस्त्रं, जलाद् घटः, इत्येवं उत्पद्येरन्। कस्मादपि कारणात् किमपि कार्यमुत्पद्येत। कापि निश्चिता व्यवस्थितिरेव न स्यात्। उक्तं च सांख्याचार्यैः

**असत्वान्नास्ति सम्बन्धः कारणैः सत्वसङ्गिभिः।**
**असम्बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः॥**

इति।

अतः- असत्पदार्थे पदार्थान्तरस्योत्पादनसामर्थ्यं नास्ति।

सर्वमपि वस्तु केनापि विशेषकारणे नोत्पद्यते।

सर्वाणि वस्तूनि सर्वेभ्यः कारणेभ्यो नोत्पद्यन्ते। यतः कारणं प्रारम्भत एव कार्ये विद्यते। कार्यकारणयोरभेदः।

तथा हि-

**असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात् ।**
**शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम् ॥**

इति। तस्मादखिलमपि जगत् कारणरूपमूलप्रकृतौ अव्यक्तावस्थामापाद् कार्यरूपे परिदृश्यते।

वस्तुनः सम्बद्धं भ्रमरहितं निश्चितं च ज्ञानं 'यथार्थज्ञानं' भवति। एतदेव सांख्याः 'अर्थपरिच्छित्तिः' इति कथयन्ति। अर्थपरिच्छित्तिः प्रमा इति वक्तुं शक्यते। प्रमासाधनानि त्रीण्येव सांख्यमङ्गीकरोति—

प्रत्यक्षम, अनुमानम् शब्दः इति। एतैः प्रमाणैः प्रमेयनिष्कर्षः। ततः प्रकृतिपुरुषविवेकः।

व्यक्तज्ञानायप्रत्यक्षप्रमाणम्, अव्यक्ताय, पुरुषसिद्धये च शब्दानुमान-प्रमाणयोरावश्यकता।

## ईश्वरः

"येनेदं सर्वं विजानाति तं केन विजानीयात्"

तथा

"विज्ञातारमरे केन विजानीयात्",

सांख्यदर्शनं बन्धमोक्षौ प्रकृतावेव चिन्तयति। प्रकृतिरेव प्रधानमि प्रतिपादयत् ईश्वरस्यास्तित्वं नाङ्गीकरोति। अतो दर्शनमिदं निरीश्वरवादि इ नास्तिकदर्शनं चेति केचिदाक्षिपन्ति। किंतु सांख्यदर्शनेन परमात्मतत्वं साध्यत्वे मन्यते। ईश्वरः लोकस्य कर्तृत्वं कर्माणि वा न सृजति। किंतु परमात्म सान्निध्यात् प्रकृतिरेव प्रवर्तते।

'ईदृशेश्वरसिद्धिःसिद्धा'-इतिसूत्रेण विज्ञानभिक्षुः स्वीये सांख्यप्रवचनभाष्ये सांख्यदर्शनमधिकृत्य परैः कृतमाक्षेपं निरसितुं प्रयतते। एवं न्यायदर्शनस्याचार्याः ईश्वरस्यास्तित्वं अङ्गीकुर्वन्त्येव।

## योगदर्शनम्

'युज्' इति काल्पनिक धातोर्योगशब्दो निष्पन्नः। कौशलम् सामर्थ्यम्, प्रयत्नः, ध्यानम्, शक्तिः, वियोगप्रभृतयोऽर्थाः सन्ति।

मनसः बुद्धीनां व्यामोहभ्रान्तीर्निवार्य बुद्ध्या गृहीतं तत्त्वं योगः प्रत्यक्षानुभूतावानयति। तपः, ब्रह्मचर्यं, प्राणायामं, धारणां, ध्यानं, समाधिं च महर्षिपतञ्जलिः सांख्यसिद्धान्तैः समन्वयमानः 'योगदर्शनम्' इति योगसूत्राणि व्यरचयत्। पतञ्जलिप्रणीतमिति 'पातञ्जलमिति अस्य नाम ख्यातम्।

योगदर्शनमिदं सांख्यदर्शनस्य क्रियात्मकं रूपमास्ते। अस्मिन्नपि दर्शने पञ्चविंशतितत्वानि अङ्गीक्रियन्ते। पुरुषः स्वभावादेव शुद्धचैतन्यमस्ति। प्रकृतेः परिणामे प्रथमतया चित्तमाविर्भवति। सत्त्वप्रधानं सदपि तदचेतनं वर्तते। सांख्यैर्निर्दिष्टान् बुद्ध्यहंकारेन्द्रियानि संमील्य योगः 'चित्तम्' इति गदति।

निखिला अपि सृष्टिः सत्त्वरजस्तमांसि इति त्रयाणामेव गुणानां परिणामरूपा। 'चित्तम्' एतेषामेव गुणानां सर्वप्रथमः सत्वप्रधानः परिणामोऽस्ति। बाह्याभ्यन्तर संसर्गेण चित्ते प्रतिक्षणं यो गुणपरिणामो भवति तस्यैव चित्तवृत्तिरिति नाम।

चित्तं मनश्च मेलित्वा पुरुषस्य 'सुक्ष्मशरीरं' भवति। सूक्ष्मशरीरधारकः पुरुषः जीवो भवति। जीवो तिष्ठति देहे। चित्तं पुरुषसन्निहितं भवति। चित्तं मनश्च न एकम्। मनः अन्तरिन्द्रियमास्ते। चित्तमिन्द्रियैः बाह्यविषयेषु समाकृष्टं भवति। तेष्वेव परिणतं भवति। परिणामा एव चित्तवृत्तयः।

आत्मसाक्षात्कारार्थं चित्तैकाग्रतासम्पादनम् आवश्यकम्। **'योगश्चित्तवृत्ति निरोधः'** इति सूत्रेण सत्त्वप्रधानस्य निर्मलचित्तस्याङ्गाङ्गिभावेन परिणतानां बहिर्मुखवृत्तीनां सांसारिक विषयेभ्यो परावर्तनम्, अन्तर्मुखेन च चित्ते विलयनमेव 'योगः' इति स्पष्टम्। चित्तैकाग्रतासम्पादनमपि योगस्यैव लक्षणम् 'चित्तं'

त्रिगुणात्मकमिति जानीमः। तत्तद्गुणबलेन चित्तस्य पञ्चविधा अवस्था भवन्ति। मूढावस्था, क्षिप्तावस्था, विक्षिप्तावस्था एकाग्रावस्था, निरुद्धावस्था चेति।

एतासु अन्तिमम् अवस्थाद्वयसाधनमेव योगलक्ष्यम्। एतद्वयसाधनं च अभ्यासेन वैराग्येण च भवति। ईश्वरप्रणिधानं समाधिसाधनमिति दर्शनमिदं कथयति। सामान्यानां तु अष्टाङ्गयुक्तः क्रियायोगोऽप्यत्र कथितः।

यमः, नियमः, आसनम, प्राणायामः प्रत्याहारः, धारणा, ध्यानम्, समाधिः इति तानि अष्टावङ्गानि।

उक्तं च-

"यमनियमासनप्राणायाम प्रत्याहार-धारणाध्यान समाधयोऽष्टावङ्गानि"।

इति।

संसारे पुरुषः क्लेशैः सकामकर्मभिश्च बहिर्मुखो भूत्वा नाना विधानि दुःखान्यधिगच्छति। तेभ्य दुःखेभ्यो निवृत्तये अन्तर्मुखो भवितुं च सरलोपायोऽस्ति अष्टाङ्गयोगः।

**यमः**-एषः पञ्चविधः। अहिंसा, अस्तेयम् ब्रह्मचर्यम्, सत्यम, अपरिग्रहः इति। एतैरेव यमैः व्यावहारिकं जीवनं सात्विकं दिव्यं च करणीयं भवति।

**नियमः**- नियमोऽपि पञ्चविधः। शौचम्, सन्तोषः, तपः, स्वाध्यायः, ईश्वरप्रणिधानञ्चेति।

**आसनम्**- स्थिरसुखमासनम्।

स्वास्तिकासनम, सिद्धासनं, समासनं, पद्मासनं बद्धपद्मासनं, वीरासनं, गोमुखासनं वज्रासनं सरलासनं-इति आसनानि सुनिश्चलां सुखपूर्वां च स्थितिं जनयन्ति।

**प्राणायामः**-'श्वासप्रतिश्वासयोः गतिविच्छेदः प्राणायामः। स्थिरासने सति प्राणायामः। अनेन मनः निश्चलं भवति।

बाह्यवायोः नासिकया अन्तः प्रवेश एव श्वासः। कोष्ठस्थितस्य वायोः नासिकया बहिः प्रापणं प्रश्वासः श्वासप्रश्वासयोर्गतिं रेचक-पूरक-कुम्भकैः बाह्याभ्यन्तरस्तम्भवृत्तिः प्राणायाम इत्युच्यते। प्राणायामेन ध्यानं सुकरं भवति।

**प्रत्याहारः**—प्रत्याहारो नाम परावर्तनं, विपरिवर्तनं, विषयेभ्यो वैमुख्यम्

इति अर्थः। बहिर्मुखानामिन्द्रियाणामन्तर्मुखीकरणं प्रत्याहारः। प्रत्याहारेभ्यो इन्द्रियाणां वशीकरणं भवति।

इन्द्रियाणामुपशमनमुपकल्प्य मनसः स्वाधीनतैव प्रत्याहारस्य लक्ष्यम्।

**धारणा**—हृदयादिस्थानेषु चित्तस्य बन्धः धारणा। 'चित्तम्' बाह्यविषयान् इन्द्रियैः वृत्तिमात्रेण गृह्णाति। तां वृत्तिं हृदयादिस्थानेषु बन्धनमेव धारणा

**ध्यानम्**—ध्येयवस्तुविषये इतरभावान् अप्रवेश्य एकाकारं प्रवाहरूपं ज्ञानमेव ध्यानम्। अत्र ध्याता-ध्येयं-ध्यानमिति त्रयाणां निर्भासः।

**समाधिः**—ज्ञाता-ज्ञेययो भेदाभाववतीं ऐक्यचित्तवृत्तिः समाधिरित्यभिधीयते। ध्येयवस्तुना आविष्टं स्वरुपशून्यं ध्यानमेव समाधिरिति यावत्। समाधौ ध्यानं ध्येयादभिन्नरूपं सत् स्वरूपशून्यमिव भासते।

एतेषु अष्टसु धारणाध्यानसमाधयः अन्तरङ्गसाधनानि। यमनियमासनप्राणायामप्रत्याहाराः बहिरङ्गसाधनानि। एतेभ्यः क्रमशः अन्तरङ्गशुद्धि बहिरिन्द्रियशुद्धिः,प्राणजयः, प्रत्याहारः, इन्द्रियाणां जयश्च भवन्ति। धारणादीनां त्रयाणां 'संयमः' इत्यपि नामधेयम्। तथाहि- "त्रयमेकत्र संयमः" इति। असंप्रज्ञातसमाधौ लक्ष्यबुद्धिः प्रणश्य, परमात्मनि मनसः लीनस्थितौ व्यष्टिरूपबुद्धिवृत्तयः प्रणश्यन्ति। इयमेव जीवन्मुक्तदशा। जीवात्मनि सहजस्वरूपस्वभावान् निरीक्ष्य पुरुषो मुक्तो भवति। तदेव कैवल्यम्।

**ईश्वरः**योगदर्शने ईश्वरः षड्विंशतितमं तत्त्वम्। ईश्वरो नाम पुरुषविशेषः। सामान्यपुरुषेषु दृश्यमानेभ्यो दोषेभ्यो अतीतोऽस्ति ईश्वरः। परमपुरुषोऽयम् ईश्वरः नित्यः सर्वव्यापकः, सर्वशक्तिमान्, सर्वज्ञश्च। क्लेशकर्मास्पृष्टः सम्पूर्णः। संकल्पमात्रेण विश्वव्यापारनिर्वर्तकः।

तथा हि-

"**क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः**" इति।

ईश्वरास्तित्वं वेदाः घोषयन्ति। तं विश्वगम्य इति बोधयन्ति। प्रकृति पुरुषयोः संयोग वियोगाभ्यां सृष्टिप्रलयौ संभवतः। अतः सर्वशक्तिमान् ईश्वरः प्रकृति पुरुषयोः संयोगवियोगौ कल्पयति। ईश्वरस्यैव प्रणवः वाचकः

शब्दोऽस्ति। एतस्य प्रणवस्य जपः प्रणवार्थभूतस्य ईश्वरस्य पुनः पुनः चिन्तनमेव ईश्वरप्रणिधानं भवति।

ईश्वरप्रणिधानेन असंप्रज्ञातसमधिलाभो भवति। अतः ईश्वरः सदा विद्यमानः, सदा च मुक्तो भवति।

ज्ञानशक्तिः इच्छाशक्तिः, क्रियाशक्तिरिति तिस्त्रः शक्तयः ईश्वरस्य गुणाः सन्ति। 'प्रणवः' ईश्वरस्यैव वाचकः शब्दः। 'तज्जपस्तदर्थ भावनम' इति सूत्रेण 'प्रणवार्थभूतस्य-ईश्वरस्य पुनः पुनः चिन्तनमेव ईश्वरप्रणिधानमिति ज्ञायते। स्वाध्याय योगाभ्यां परमात्मा प्रकाशततिं व्यासोक्तमत्र स्मर्तव्यम्—

ते इति **स्वाध्यायाद् योगमासीत योगात् स्वाध्यायमामनेत**
**स्वाध्याययोगसम्पत्या परमात्मा प्रकाशते॥**

इति

इत्थं 'सांख्यायोगौ' तत्वज्ञान विवरणे समानावेव। तत्वानां संख्यादृष्टया केवलं योगदर्शने षड् विंशतितत्वानि सन्ति। सिद्धान्त दृष्ट्या, फलप्राप्ति दृष्ट्या च उभयोरपि साम्यम्॥ तदुक्तं भगवता श्री कृष्णेन—

**सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः,**
**एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्।**
**यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते,**
**एवं संख्यं च योगं च यः पश्यति स पश्यति॥**

इति [भ. गी. अ. ५]

सांख्यायोगौ संसार सागर निमग्नं जनं द्वन्द्वरहितः, नित्यः सत्वगुणेस्थिरः कस्यापि वस्तुनः प्राप्तिरक्षणतत्परश्च माभूदिति बोधयतः। तदैव मानवः निष्काम कर्मकर्तुमुद्यतो भवतीति दर्शनद्वयमिदमस्मान् बोधयति।

## मीमांसादर्शनम्

'वेदोऽखिलो धर्ममूलं' इति भारतीयानामस्माकं वेदाः धर्मप्रमाणेषु प्रथमपरिगणिताः सन्ति। अपौरुषेयोऽयं नानाशाखासंकुलः अतिमहान् वृक्षः। अनन्तस्य, दुरवगाहस्य चास्य प्राक्तनैरस्माकं महर्षिभिः भूयांसः नियमाः,

परिकल्पिता विलसन्ति। वेदार्थज्ञानेनैव कर्मावबोधनं भवतीति, निरर्थकस्य शब्दस्य धारणमप्यनर्थकमिति (दार्शनिकाः) मीमांसकाः स्पष्टयन्ति। तथाहि

**दृष्टो हि तस्यार्थः कर्मावबोधनं नाम'**-इति।

**स्थाणुरयं भारहारः किलाभूत्**
**अधीत्यवेदं न विजानाति योऽर्थम्**
**योऽर्थज्ञइत्सकलं भद्रमश्नुते**
**स नाकमेति ज्ञानविधूतपाप्मा ।।इति।**

वेदार्थज्ञानस्य प्राशस्त्यं, तदज्ञानस्य निन्दा च भारतीय संस्कृतौ परिदृश्येते। एवं प्रतिभारतीयम् अत्यन्तावश्यकस्य वेदार्थज्ञानस्य चक्षुर्द्वयमास्ते। व्याकरणं मीमासा चेति। इदमेव-

**यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम्।**
**तावुभौ पुण्यकर्माणौ पङ्क्तिपावन पावनौ ।।**

इति श्लोकेन ज्ञायते।

तत्र-अन्येषां पदानामिव 'मीमांसा' पदस्यापि निष्पत्तिः व्याकरणशास्त्राधीनैव भवति। 'मानपूजायाम्' इति धातुपाठपठितात् मान्धातोः 'मीमांसा' इति पदं वैयाकरणाः निष्पादयन्ति।

**मान्बधदान्शान्भ्योदीर्घश्चाभ्यासस्य**

अष्टाध्यायी-३-२-५

इति सूत्रात् **'मानेर्जिज्ञासायाम्'** (८-४-२४) इति वार्तिकात्

च 'मीमांसा' इतिपदं निष्पन्नं भवति। वेदवाक्ययार्थविचारम् एव 'मीमांसा' पदमिदं प्रतिपादयति।

वेदः कर्मकाण्डरूपेण ब्रह्मकाण्डरूपेण च द्विधा विभक्तोऽस्ति। तदर्थनिर्णयौपयिकी मीमांसापि कर्ममीमांसा-ब्रह्ममीमांसा' चेति द्विधा सती विलसति। तत्र 'कर्ममीमांसायाः' पूर्वमीमांसा' इति, ब्रह्ममीमांसायाः 'उत्तरमीमांसा' इति च व्यपदेशोऽस्ति।

पूर्वमीमांसा मन्त्रब्राह्मणान्याधृत्य वैदिकजीवनसम्बद्धमनुष्ठानभागं परिशीलयति। तदत्र वयं पूर्वमीमांसादर्शनमनुशीलयामः।

वेदस्य मन्त्रभागापेक्षया ब्राह्मणभागस्य प्राधान्यमुररीकृत्य वेदे क्रियाणामेव प्रामुख्यमिदं दर्शनं निरूपयति। वेदोचितानि कर्माणि विवृत्य, संशयांश्च निवार्य ज्ञानोदयसाधनत्वेन तानि वर्णितान्यस्मिन् दर्शने।

जैमिनिमहर्षिणा रचितानि 'मीमांसासूत्राणि' पूर्वमीमांसादर्शनस्य मुख्य ग्रन्थः। वेदार्थसारभूतोऽयं महान् सूत्रसमूहः द्वादशसु अध्यायेषु निबद्धः। इमानि सूत्राण्यवलम्ब्य 'श्री शबरस्वामी' भाष्यमारचितवान्। अस्य च भाष्यस्य प्रभाकर गुरुः 'बृहती' 'लघ्वी' चेति टीकाद्वयमलिखत्। कुमारिलभट्टश्च 'श्लोकवार्तिकम्' 'तन्त्रवार्तिकं' चेति टीकाद्वयं व्यरचयत्। एवमेतौ 'प्राभाकरमतं', 'भाट्टमतं' चेति मतद्वयस्य प्रवर्तकावभूताम्।

मृत्योरतीतानि यज्ञादिकर्मफलानि स्वर्गे भोक्तुं 'आत्मा' अस्तीति विश्वासः।

कर्मकाण्डस्याधारभूतानां वेदानामपौरुषेयत्वे, निर्दुष्टत्वे च निश्चयबुद्धिः।

प्रपञ्चे मानवजीवनं सत्यम्, न पुनः स्वप्नतुल्यम इति निर्णयः। इमे पूर्वमीमांसकानां सिद्धान्ताः सन्ति।

मीमांसकाः प्रपञ्चं सत्यं शाश्वतं चेति विश्वसन्ति प्रपञ्च निर्माणकारणानि द्रव्यानि नित्यसिद्धानि सन्ति। इमानि परिणाममात्रलभ्यानि। सर्वमपि नित्य-द्रव्यम् आकृतौ गुणे च परिणामं प्राप्नोत्येव। एवं मीमांसकानामयं परिणामवाद सिद्धान्तः। एतेषां मते मूलद्रव्याण्यनेकानि। आत्मद्रव्ये च आकार परिणामान् एते आरोपयन्ति। अखिलस्यापि प्रपञ्चस्य सृष्टिप्रलयौ संभवतः इति असम्भवइति मीमांसकानां दृढा मतिः।

'न कदाचित् अनीदृशं जगत्' इति प्रवदन्ति। न्यायवैशेषिकानां नवद्रव्याण्यङ्गीकृत्य 'अन्धकारः' 'शब्द' श्चेति द्रव्यान्तरद्वयं संयोजयन्ति। सर्वाण्यपि द्रव्याणि प्रत्यक्ष प्रमाणगोचराणि, तत्र मनः केवलं परोक्षतया गणयन्ति। 'पृथिव्यप्तेजोवायवः'इति चत्वारि द्रव्याणि 'अन्धकाराख्येन द्रव्येन सह मिलित्वा अणुभिः (निर्मीयन्ते) निर्मितानीति; अपराणि सर्वाण्यपि आत्मना सह अनन्तानीति चैतेषां सिद्धान्तः। अणुरत्र दर्शने दृग्गोचरमयः सूक्ष्मः पदार्थोऽस्ति।

**आत्मा-ज्ञानम्**

मीमांसादर्शने आत्मा नित्यः, अनन्तः, नाना च अयमप्येकं द्रव्यम्। मीमांसकानां जगत्सत्यम्। अतः तस्मिन् जगति शरीरोपाधिना सम्बन्धमेत्य अयमात्मा, मरणानन्तरं कर्मफलान्यनुभवत् नित्यद्रव्यमास्ते।

ज्ञानं आत्मनः स्वतःसिद्धं सदा च विद्यमानं लक्षणं नास्ति। कादाचित्केन संभवन् क्रियाविशेषोऽथवा व्यापार एव ज्ञानम्। इदं तु इन्द्रियगोचरं भवति। "ज्ञाता-ज्ञेयं = ज्ञानम्"-इति त्रिपुटज्ञानमभिवर्णयन् प्रभाकरगुरुः उत्पत्तेरनुपदमेव ज्ञानं "विषयं-आत्मानं-स्वां" च प्रकाशयतीति वदति। परन्तु कुमारिलभट्टः ज्ञानस्य स्वप्रकाशत्वं नाङ्गीकरोति। भाट्टमते आत्मा कर्ता, भोक्ता, ज्ञानात्मकः ज्ञेयश्च। प्राभाकरास्तु आत्मनः ज्ञेयत्वं नाङ्गीकुर्वन्ति।

**ईश्वरः** कृत्स्नमपि मीमांसादर्शनं परिशोध्य दर्शनेनापि उपनिषत् प्रतिपादितो ब्रह्मप्रंशंसा पुराणप्रोक्तानि ईशादि नामानि वा न दृश्यन्ते।

परिदृश्यमानमिदं जगत्-नित्यम्। सृष्टिःप्रलयो वा नास्ति। तत्सृष्टये प्रलयाय वा कारणभूतस्य ईश्वरस्य नास्ति आवश्यकता। जगन्निर्माणार्थं कर्मफलान्येव 'अलम्' इति तेषां वादः। नानाविधैरात्मभिः कृतानि पुण्यपापकर्मणोर्फलान्येव सृष्टिकारणानि। वेदस्य नित्यत्वम् अपौरूषेयत्वं च रक्षितुं 'ईश्वरास्तित्वं' दर्शनमिदं खण्डयति। मरणानन्तरं स्वर्गादिभोगान् जन्मराहित्यमोक्षान् वा प्रसादयितुमीश्वरो-नापेक्षते। यज्ञयागदि कर्मानुष्ठान एव तेषां संपूर्ण विश्वासः। यतो हि पूर्वमीमांसायाः मुख्यः विषयः यज्ञः महायज्ञश्च।

## मोक्षः

परिदृश्यमानेन जगता सह आत्मनः शरीरेन्द्रियविषयाणां सम्बन्धविनाश एव मोक्षः। एतैरेव त्रिभिः बंन्धनैर्मनुष्यो बद्धोऽस्ति। एतस्य बन्धस्यात्यान्तिकनाश एव मोक्ष इत्यभिधीयते। उक्तं च शास्त्रदीपिकायाम्-

प्रपञ्चसम्बन्धविलयो मोक्षः। त्रेधा हि प्रपञ्चः पुरुषं बध्नाति। तदस्य त्रिविधस्यापि बन्धस्यात्यान्तिको विलयो मोक्षः" इति। नित्यानां नैमित्तिकानां च कर्मणामनुष्ठानेन पूर्वपापानां क्षयो भवति। सुखदुःखदीनामनुभवेन विनश्यति।

**प्रमाणानि**

मीमांसादर्शनं षट् प्रमाणान्यङ्गीकरोति। तत्र प्रभाकरः 'प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः, अर्थापत्तिरिति पञ्च प्रमाणानि निर्दिशति। कुमारिलभट्टस्तु 'अनुपलब्धिः' इति अन्यत्प्रमाणमपि अङ्गीकरोति।

जगदिदं यथार्थमिति विश्वसन्तो मीमांसकाः यथार्थस्य हानिरुपजायत इति, 'अनवस्थादोषः' संभवतीति निरस्य स्वतः प्रामाण्यमङ्गीकुर्वन्ति। तत्रापि भाट्टाः, प्राभाकरा. मुरारिमिश्र इति त्रयोऽपि मीमांसकाः प्रामाण्यं स्वत इति वदन्ति। अत्र स्वशब्द आत्मीयपरः। प्रभाकर मते स्वतः-स्वेन ज्ञानेनैव तद्गतं प्रामाण्यं गृह्यते इत्यर्थः। प्रामाण्यं नाम स्मृत्यनुभव साधारणं यथार्थत्वमेव।

इत्थं प्रामाण्यं स्वतो ज्ञायते अथवा परत इति—

**जिज्ञासायां**-दर्शनानां परस्परं विभिन्ना स्थितिः। तथाहि-प्रामाण्यं स्वतः अप्रामाण्यं परतइति मीमांसकाः। प्रामाण्यमप्रामाण्यमुभयं परत इति नैयायिकाः। अप्रमाण्यं स्वतः प्रामाण्यं परत इति बौद्धः। प्रामाण्यमप्रमाण्यमुभयं स्वत इति सांख्याः इति। इमां च सम्यगवगन्तुं तत्तन्मतानां गभीराध्ययनमावश्कमित्यलम्।

मीमांसादर्शनमिदं सिद्धान्तनिर्णये तदाचरणविधाने च स्ववैशिष्ट्यमुपस्थायति। वैदिके वेदप्रतिपादित धर्मे वा बुद्धिं केन्द्रीकृत्य स्वजीवनगम्यस्य अधिगमनमेवैतेषामाशयः। वैदिककर्मानुष्ठानमेव वेदस्य मुख्यं प्रतिपाद्यमिति-अस्य दर्शनस्य सिद्धान्तः।

'चोदनालक्षणो धर्मः' इति लक्षणलक्षितो धर्मः। चोदना च कर्मप्रवर्तक वैदिक वचन विशेषम्। वैदिकवचनैर्विधीयमानस्य कर्मणः कारणमेव धर्मः इति पर्यवस्यति। वेदः मन्त्रब्राह्मणात्मक शब्दराशिः। इष्टसाधने धर्मे प्रवर्तनं; अनिष्टसाधने अधर्मे अप्रवर्तनमेव वेदस्य प्रयोजनम्। एतच्च विधिवाक्यैरेव ज्ञायते। विधिरूपादेशा बहवः। तथाहि-

नित्यकर्माणि, नैमित्तिककर्माणि, काम्यकर्माणि इति। एतेषु नित्यनैमित्तिककर्माणि सर्वेणापि करणीयान्येव। एतत्कर्मानुष्ठानात् पुण्यं न जायते प्रत्युत अननुष्ठाने पापं तु संभवति। अतः कर्तव्यता दृष्ट्या सम्पादनीया

धर्मा एते। एवमस्मान् दर्शनमिदं नित्यनैमित्तिककर्माणिकर्तुं प्रेरयति। शास्त्र निषिद्धकर्माणि न आचरेत्। अतः नित्यादिकर्मभ्यो निरतिरेव वेदतात्पर्यमिति अस्यदर्शनस्य निर्णयः।

## उत्तरमीमांसा

वेदस्योत्तरभागं ज्ञानकाण्डं मीमांस्यते अनया इति मीमांसा। 'वेदानामन्तः परोऽवधिः तत्वज्ञानस्य पराकाष्ठा वा, इति व्युत्पत्या वेदान्तशब्दस्य प्रयोगः 'उपनिषदाम्' अर्थे भवति। उपनिषदां विचार एव उत्तरमीमांसा इत्युच्यते। 'वेदान्तदर्शनम्' इत्यस्य नामान्तरं प्रसिद्धम्। प्रसिद्धासु दशोपनिषत्सु वेदसार एव संगृहीतः। ऋषिभिर्दृग्गोचरीकृतानि परमसत्यान्येव-उपनिषद्रूपेण समाकलितानि। तथा विभिन्नोपनिषदाम् अर्थं भगवान् बादरायणः सूत्रेषु संगृहीतवान्। 'वेदस्य लक्ष्यं ब्रह्म'इति तत्प्राप्तिश्च ज्ञानसाधनेनैव भवतीति च बादरायणस्योद्देश्यम्। उपनिषत्प्रतिपादितान् भावान् क्रोडीकृत्य सूत्राणि रचितवानिति इमानि 'वेदान्तसूत्राणि इति केचिद वदन्ति। एतेषु ब्रह्मप्रतिपादनमत्यन्तं प्रधानमित्यतो 'ब्रह्मसूत्राणी'ति, चापरे वदन्ति।

एतेषां बादरायणसूत्राणां मतत्रयकर्तृत्वेन प्रसिद्धिमिताः शङ्कर-रामानुज-मध्वाचार्याः भाष्यानि व्यरचयन्। उपनिषदः, भगवद्गीता च एभिराचार्यैः व्याख्यायन्त। मेधावन्त इमे स्व नैसर्गिक्या प्रतिभया, स्वदृष्टिभेदेन च बादरायणसूत्राणां भिन्नान् सिद्धान्तान् निरधारयन्। प्रत्येकेनापि आचार्येण 'सूत्रकारस्य हृद्गतोभावः निष्पक्षपातेन स्पष्टीक्रियते' इति अनिगद्यत।

इत्थं वेदान्ते मुख्यास्त्रयः संप्रदायाः समजायन्त। तत्र श्रीशङ्कराचार्यस्य **सिद्धान्तोऽद्वैतसम्प्रदाय'** इति, श्री रामानुजाचार्यस्य सिद्धान्तो **'विशिष्टाद्वैतसम्प्रदाय'** इति, **श्रीमध्वाचार्यस्य सिद्धान्तो द्वैतसम्प्रदायः'** इति। **मतत्रयमत्र संक्षेपेण परिशीलयामः।**

## अद्वैतसम्प्रदायः

सम्प्रदायस्यास्य श्रीशङ्कराचार्यः प्रवर्तक इति यद्यपि विख्यातः, तथापि उपनिषद् द्रष्टारौ याज्ञवल्क्य-उद्दालकौ अद्वैतमत प्रतिष्ठापयितारौ महनीयौ-

आस्तामिति ज्ञायते। 'अयमात्मा ब्रह्म' इति याज्ञवल्क्योपदेशः, 'तत्त्वमसि' इति प्रबोधयितुरुद्दालकस्य तत्त्वं परवर्ति सिद्धान्तानां आधराविति वक्तुं शक्यते। श्री शङ्कराचार्यस्य परमगुरुः गौडपादस्तु 'औपनिषदिकं तत्वं सुष्ठु प्रतिष्ठापयन् माण्डूक्योपनिषदाधारेण **स्पर्शतन्मात्र** व्यरचयत्। माण्डूक्यकारिकाग्रन्थोऽयं 'अद्वैतसिद्धान्तनिरूपणे अद्भुतोऽस्ति।

गौडपादस्यास्य शिष्योऽस्ति गोविन्दपादः। तस्य च शिष्योऽस्ति शङ्करः। एष आचार्यः नितरां प्रतिभावत्सु भारतीय प्रवक्तृषु अन्यतमः। असावेव महापुरुषः स्वाल्पे वयसि प्रस्थानत्रयस्य भाष्यं, 'उपदेशसाहस्री' 'विवेकचूडामणिः''अपरोक्षानुभूतिः' 'शिवानन्दलहरी' सौन्दर्यलहरी चेति स्वतन्त्रग्रन्थानपि व्यलिखदिति सर्वविदितम्।

**श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।**
**ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नाऽपरः॥**

इति श्लोकेन-वेदान्तः केवलं ब्रह्मण एव सत्तां मनुते, जीवो ब्रह्मण एव रूपमस्ति नापरः कश्चन पदार्थः। अतो जीवात्म-परमात्मनोरैक्यम् अभेदो वा 'अद्वैतम्' इति ज्ञायते। अतः सम्प्रदायेऽस्मिन् नित्यं शुद्धं, बुद्धं, मुक्तं च ब्रह्म एव परमार्थतया विद्यते। तदेव 'चित्' इत्यप्युच्यते।

ब्रह्मतत्वमिदं परिपूर्णम् सर्वगतम्, अखण्डस्वरूपम् स्वयं प्रकाशकं च। गुणाश्रयभूतं द्रव्यं नास्ति। 'कार्योत्पत्तिं' जनयत्कारणं नास्ति। सच्चिदानन्द पदानि एतन्निर्गुणब्रह्मणि प्रयुक्तानि।

'ब्रह्म' तावत् सर्वविधसम्बन्धरहितम् इत्यतो गौडपादः 'अस्पर्शयोग' इति वर्णयति। जाग्रत्स्वप्नसुषुप्त्यवस्थात्रितयं ब्रह्मसम्बद्धं नास्ति। अतस्तुरीयमिदमित्याह। न च पुनरिदं 'चतुर्थावस्था' काचित्। केवलमिदं अवस्थात्रितयमतिक्रम्य विद्यमाना 'अतीतस्थितिः'। इयमेव निर्गुणब्रह्मस्थितिः। साधारणबुद्ध्यतीतेयम् अनुभवैकवेद्या च।

जगतः बहुत्वरुपेणानुभवो भवति। सोऽयमनुभवो यथार्थो न भवति। अद्वैतसिद्धान्ते ब्रह्मैव सत्यम्। तदेकं, नित्यम्, अनन्त्यं च भूत्वा नानात्वेन भासमानस्य जगतः अधिष्ठानरूपं भवति। परं तु सत्यभूतस्य ब्रह्मणः अगोचरात्,

मिथ्याभूतमिदं जगत् यथार्थ इति, भाति। किमपि कारणमत्र स्यात्। तदस्ति '-माया'। मायया स्थितिः विपर्यस्ता सती दृग्गोचरी भवति

मायायाः द्विविधं कार्यम्। यथार्थस्य आवरणम् अयथार्थस्य च विक्षेपः।

मायामेव अभाव इति, 'अविद्या' इति, मूलप्रकृतिरव्यक्तमिति, अज्ञानमिति च वदन्ति।

मानवः मायया अज्ञानेन वा निर्गुणं निराकारं च ब्रह्म सगुणं साकारमिति भावयति। एकमेव ब्रह्म नानाविधदृश्ये जगद्रूपे पश्यति। माया सत्यमसत्यमितिवा वक्तुं न शक्या। अत एव मायायाः स्वरूपं अद्वैतानुयायिभिरेवमभिहितम्

**सत्यप्यसत्यप्युभयात्मिका नो**
**भिन्नाऽप्यभिन्नाप्युभयात्मिका नो।**
**साङ्गाऽप्यनङ्गाप्युभयात्मिका नो**
**मायाद्भुताऽनिर्वचनीयरूपा॥**

इति। अतः तया मायया उपाधिभूतया युक्तं चिदेव सगुणब्रह्म। सगुणब्रह्मैव ईश्वर इत्युच्यते। प्रपञ्चस्य सृष्टिस्थितिलयानां कर्ता। सृष्टिरत्र आभासरूपा। आभासस्य कारणं 'माया' इति जानीमः। जीवा ईश्वरस्य प्रतिबिम्बताः अद्वितीयं चैतन्यमेवौपाधिभेदेन ईश्वरः जीवइति च सम्बोध्येते।

ब्रह्म-ईश्वरः-जीवश्चेत्यिमे एकस्यैव चैतन्यस्य स्वरूपाणि। इदं हि चैतन्यं कीदृशैरपि उपाधिभिरसम्बद्धं 'केवल' रूपं तिष्ठति तदा ब्रह्म इति, मायोपाधिना सह तिष्ठति तदा सगुणब्रह्म अथवा ईश्वर इति, अविद्योपाधिना च सहविद्यमानं भवति तदा जीव इति व्यवह्रियते।

उपाधिभेदाज्जीवाः बहुसंख्याकाः। उपाधिद्वारैव जीवाः सुखदुःखाद्यनुभवान् प्राप्नुवन्ति।

स्थूलशरीरं-सूक्ष्मशरीरं-कारणशरीरमिति जीवोपाधीन् त्रिषुवर्गेषु विभज्य वर्गान्तरैरपि विभज्य 'कोष' इत्याहुः।

अन्नमय प्राणमय-मनोमय-विज्ञानमय आनन्दमय कोषा इति प्रसिद्धाः। इमांश्च कोशान् तिसृभिरवस्थाभिर्योजयन्ति।

अद्वैतवादिनः सांख्यानां सत्कार्यवादं व्यावहारिकस्थितावङ्गीकृत्यापि पारमार्थिक स्थितौ निराकुर्वन्ति। यतः अद्वैते प्रपञ्चः ब्रह्म परिणाम इति अनुक्त्वा ब्रह्मविवर्त इत्युच्यते। विवर्तसिद्धान्तस्य दृष्टान्ता अनेके। यथा-

अन्धकारे प्रयाणं कुर्वन् कश्चित् पथिकः मार्गे विद्यमानं रज्जुं वीक्ष्य सर्प इति भावयति। तस्य रज्जुः सर्पइव भासते। सर्पभ्रान्तिरियं विशेष पथिकस्यानुभवः। रज्जु इति यथार्थज्ञानं बहूनां सामान्यानुभवः। अत्र रज्जुः सर्वस्य वास्तविकं कारणं नास्ति। तयोर्द्वयोः कार्यकारणसम्बन्धोऽपि नास्ति।

तथापि सर्पभ्रान्तेः रज्जुः कारणम् भवति।

अतः सर्प इति बुद्धिरियं तात्कालिकी। ईदृशमनुभवज्ञानं सत्यमिति वा असत्यमिति वा वक्तुं न शक्यते। तस्मान्मिथ्येदं ज्ञानम्। एवमेव विकार रहिते अखण्डरूपेण विद्यमाने ब्रह्मणि जगत् भासते। अत्रापि जगन्मिथ्या। मिथ्याकार्यं यस्य कारणस्य भवति-तत्कारणं विवर्तकारणमिति कथ्यते। अयमेव अद्वैते विवर्तवादः कथ्यते।

दर्शनमिदं पूर्वमीमांसा इव षट्प्रमाणानि अङ्गीकरोति। प्रत्यक्ष, अनुमानम् उपमानम, शब्दः अर्थापत्तिः अनुपलब्धिःश्चेति। तेषु 'शब्दप्रमाणं'

मीमांसकानां मुख्यम्। 'शब्दप्रमाणत्वेन वेदोऽपौरुषेय इति मीमांसकावुभावपि विश्वसितः। अपौरुषेयपदनिर्वचनमात्र भेदः।

## मोक्षः

अद्वैतसिद्धान्ते मुक्तिः नूतनतया उत्पद्यमाना काचिद् दशा नास्ति। ज्ञानेन तस्याः आविर्भावो भवति। ज्ञानेन आरोपितकर्तृत्वादिकं निवर्तते। अज्ञानदृष्टिः प्रणश्य प्रज्ञादृष्टिरुपजायते। तदा मायाबन्धान्मुच्यते जीवः। भौतिककायं विसृज्य जीवन्मुक्तः विदेहमुक्तिं लभते।

परिदृश्यमानस्य चराचरजगतः सृष्टये मायौपधिकः ब्रह्मचैतन्येश्वर एव। असावेव सृष्टिकर्मणः उपादानकारणं, निमित्तकारणं च। तत्र ऊर्णनाभिसादृश्यं दर्शयतीदं दर्शनम्। सृष्टिक्रमे 'हिरण्यगर्भः, आद्यः सृष्टिप्रक्रियायां 'पञ्चीकरण प्रक्रिया' वेदान्तानां विशिष्टेति परिकीर्त्यते।

इत्थमद्वैतवादस्य संक्षिप्तोऽयं परिचयः। अथ-विशिष्टाद्वैत-द्वैतवादयोः परिचयं प्राप्नुमः।

## विशिष्टाद्वैतम्

श्री रामानुजाचार्यः- एतन्मतप्रवर्तकः। विशिष्टाद्वैतदर्शनस्य आधारभूतानि शास्त्राणि तावत् संहिताः, उपनिषदः, भगवद्‌गीता, ब्रह्मसूत्राणि, वैष्णवागमाः, भागवतादि पुराणानि, आल्वार्' रचनाश्चेति बहूनि सन्ति।

'ब्रह्म'-सगुणसाकार स्वरूपम् इति आचार्योऽयं कथयति। अस्मिन् मते सगुण ब्रह्म नित्यजीवाः, अचेतनाप्रकृतिरिति एतत्त्रितयमपि सत्यम्। जीवोऽस्ति अणुस्वरूपम् जीवः परतन्त्रः अपरिपूर्णश्चेति यावत्। जीवा नित्यमुक्तबुद्धाः इति त्रिधा विभक्ताः सन्ति।

प्रकृतिश्च ईश्वरवद् नित्यः पदार्थः। प्रकृतेः गुणेषु ईश्वरेच्छाया उपचयापचयाभ्यां सम्भवकाले सृष्टिः प्रारभते।

रामानुजाचार्यः मायावादं नाङ्गीकुरुते। सृष्टिकारक ईश्वर इव जगदपि सत्यम्।

मायया ईश्वरः विचित्रं जगत् सृजति। 'श्रीभाष्ये'- मायावादं बहुधा खण्डयति।

किंच प्रत्यक्ष-अनुमान-शब्द इति प्रमाणत्रयमेवाङ्गीकरोति। तत्रापि शब्दप्रमाणं परमोत्कृष्टप्रमाणमास्ते। दर्शनेऽस्मिन् ज्ञानं यथार्थम्। अयथार्थरूपं ज्ञानमेव नास्ति। स्वप्नज्ञानमपि सत्यमेव। स्वप्नाः असत्याः न।

अत्र सिद्धान्ते सत्कार्यवादः अङ्गीक्रियते। कार्यं तु कारणपरिणाम एव। जीवस्य मुक्तये शरणागतिरेव कारणम्। अस्यैव 'प्रपत्ति' रिति नामान्तरम्। सिद्धान्तेऽस्मिन् जीवन्मुक्तिर्नास्ति। यावज्जीवेत् तावत् विध्युक्तकर्माणि-आचरन् जनः ईश्वर भक्त्या मुक्तिमियादिति दर्शनमिदं मानवं प्रेरयति।

## द्वैतवादः

अस्य द्वैतसम्प्रदायस्य प्रतिपादकः श्री मध्वाचार्यः। वेदाः पाञ्चरात्र वैष्णवगमाः, ब्रह्मसूत्राणि, भगवद्गीता, रामायणं महाभारतं -|कारिका|| पुराणानि

द्वैतमतस्यास्य प्रमाणग्रन्थाः। एष आचार्योऽपि ब्रह्म साकार सगुण स्वरूपम् इति प्रतिपादयति। समस्तसद्‌गुणाश्रयः शोभनमूर्तिः महाविष्णुरेव अस्मिन् सिद्धान्ते परमात्मा।

ब्रह्म-जीवः-प्रपञ्चः -इमे त्रयः द्वैतमते सत्यपदार्थाः। तत्र ब्रह्म तावत् आनन्दकल्याण गुणपरिपूर्णः। निरस्त समस्त दोषः, ज्ञान गम्यः श्री महाविष्णुः। वेदाध्ययनेन ज्ञानयोग्योऽयं ब्रह्मपदवाच्यो विष्णुः।

जगददिदं प्रकृत्या समुद्‌भवति। पुनस्तत्रैव निलीनं भवति। प्रकृतिरुपादान कारणम् भगवान् निमित्तकारणम् जगददिदं सत्यं, न पुनर्मिथ्या। ज्ञानं स्वतः प्रमाणम् जीवो विष्णुमुपास्य मुक्तःसन् वैकुण्ठे विष्णुं प्रतिपद्यते।

इत्थं भारतीय दर्शनानानि दृष्टिभेदेन विभिन्नानि सन्ति। सर्वेष्वपि दर्शनेषु 'जगद आत्मा-ईश्वरः-जीवः'- इत्येतेषां दृष्टिभेदयुतं व्याख्यानमस्मासु तात्विकदृष्टिमुत्पादयति। प्रायः सर्वाण्यपि दर्शनानि जगददिदं दुःखमयमिति मन्वते। तस्य दुःखस्य कारणं अविद्या। सर्वोऽपि स्व अज्ञानवशात् दुःखात्मकमिदं जगत् सुखात्मकमिति अवगच्छति दुःखं च विन्दति। दुःखनिरोधाय अपि सर्वाणि दर्शनानि मार्गमुपदिशन्ति। 'आत्मतत्वविचारं स्व स्व शैल्या प्रतिपादयन्ती कार्यकारण सिद्धान्तं, प्रत्यक्षानुमानादीनि प्रमाणानि चोररीकृत्य आत्यान्तिकदुःखनाशः, परमानन्दप्राप्तिश्च मानवस्य जीवनलक्ष्यमिति भावयन्ति।

दर्शनविचारैः प्रेरिता भारतीया सांस्कृतिः समये समये परिष्कृता परिवर्धिता च विश्वसंस्कृतिप्रेरिका विलसति।